ई ५

काव्य

नं. ५८० ई ५ म. ग्रं. सं. ठाणें

| विषय | लेखक | सन |
|---|---|---|
| काव्य | गोवर्धनदास लक्ष्मीदास | १८७८ |

संग्रहालय क्रमांक

पुस्तकाचें नांव स्तोत्रकोष भाग १

# स्तोत्रकलाप

## भाग १ ला.

हा ग्रंथ

भाटिया ज्ञातीय विद्यावृद्धि इच्छिणार

## गोवर्धनदास लक्ष्मीदास

यांणीं

## लोककल्याणार्थ

पुणें पेठ शनवार मोहुणपुरा येथें

रावजी श्रीधर गोंधळेकर यांचे

जगद्धितेच्छु छापखान्यांत छापून प्रसिद्ध केला असे.

आवृत्ति ३ री.

मिति मार्गशीर्ष वद्य ७ शाके १७९७ युवना०

किंमत ८ आणे.

( सन १८६७ चा आक्ट २५ प्रमाणें हक्क नोंदला आहे .

# भूमिकापत्र.

मी सर्व विद्वज्जनांस विनयपूर्वक कळवितों कीं, सर्वांस एक एक निरनिराळें स्तोत्र मिळविण्याविषयीं फार श्रम पडतात तथापि इतकीं स्तोत्रें प्रसिद्ध नसल्यामुळें लोकांस फार मेहेनत पडत असे. या कारणास्तव मी जागोजागींचीं स्तोत्रें मिळवून एकत्र करून स्तोत्रकलाप या नावाचें पुस्तक करून त्याचे तीन भाग केले आहेत त्यांपैकीं हा प्रथम भाग विद्वान रतनजी कृष्णाजी बधीर यां कडून यथामति शुद्ध करवून छापला आहे तथापि नजरचुकीनें अशुद्धें राहिलीं असतील त्यां विषयीं विद्वज्जनानीं क्षमा करावी. राहिलेल्या दोन भागांत पुरातन व अप्रसिद्ध चमत्कारिक यमकबद्ध असे ग्रंथ छापणार आहें तर यास विद्वज्जनानीं मान दिला पाहिजे.

गो० ल०.

# अनुक्रमणिका.


| | पृष्ठ. |
|---|---|
| दत्तात्रेयस्तोत्र. | १ |
| नारायणवर्म. | ३ |
| विष्णुपंजरस्तोत्र. | ११ |
| नारायणस्तोत्र. | १५ |
| शालिग्रामस्तोत्र. | १८ |
| तुलसीकवच. | २४ |
| तुलसीस्तोत्र. | २७ |
| रामरक्षास्तोत्र. | ३० |
| रामस्तवराज. | ३५ |
| ब्रह्मकृतरामस्तुति. | ५२ |
| रामगीता. | ५४ |
| संक्षिप्तरामायणमूल. | ६७ |
| पांडवगीता. | ८१ |

| | |
|---|---|
| सप्तश्लोकीगीता | ९७ |
| चतुःश्लोकीभागवत | ९८ |
| शिवकवच | १०० |
| शिवमानसपूजा | ११२ |
| शिवापराधक्षमापनस्तोत्र | ११४ |
| शिवपंचाक्षरीस्तोत्र | ११९ |
| शिवस्तुति | १२० |
| रावणकृतशिवतांडवस्तोत्र | १२४ |
| उपमन्युकृतस्तोत्र | १२८ |
| महिम्नस्तोत्र | १३२ |
| ज्योतिर्लिंगस्तोत्र | १४२ |
| द्वादशज्योतिर्लिंगानि | १४५ |
| दारिद्र्यदहनस्तोत्र | १४५ |
| ज्वरस्तोत्र | १४८ |
| कालभैरवाष्टक | १४९ |

यज्ञरूपधरायच ॥ यज्ञप्रियायसिद्धायद-
त्तात्रेय० ॥ ५ ॥ आदौब्रह्मामध्येविष्णुरंतेदेवःस
दाशिवः ॥ मूर्तित्रयस्वरूपायदत्तात्रेय० ॥ ६ ॥ भो
गालयायभोगाययोग्ययोग्यायधारिणे ॥ जि
तेंद्रियजितज्ञायदत्तात्रेय० ॥ ७ ॥ दिगंबराय
दिव्याय दिव्यरूपधरायच ॥ सदोदितपरब्र-
ह्मदत्तात्रेयन० ॥ ८ ॥ जंबुद्वीपेमहाक्षेत्रे मातापु
रनिवासिने ॥ जयमानसतांदेवदत्तात्रेयन०
॥ ९ ॥ भिक्षाटनंगृहेग्रामेपात्रंहेममयंकरे ॥ ना
नास्वादमयीभिक्षादत्तात्रेयन० ॥ १० ॥ ब्रह्म
ज्ञानमयीमुद्रावस्त्रमाकाशभूतले ॥ प्रज्ञान
घनबोधायदत्तात्रेय० ॥ ११ ॥ अवधूतसदा-
नंदपरब्रह्मस्वरूपिणे ॥ विदेहदेहरूपायद-
त्तात्रेय० ॥ १२ ॥ सत्यरूपसदाचारसत्यधर्म
परायण ॥ सत्याश्रयपरोक्षायदत्तात्रेयन० ॥

१३॥शूलहस्तगदापाणिनवमालासुकंधर यज्ञसूत्रधरब्रह्मदत्तात्रेय०॥१४॥क्षराक्षर स्वरूपायपरात्परतरायच॥दत्तमुक्तिपरस्तो त्रदत्तात्रेयनमो०॥१५॥दत्तविद्यायलक्ष्मी शदत्तस्वात्मस्वरूपिणे॥गुणनिर्गुणरूपाय दत्तात्रेयन०॥१६॥शत्रुनाशकरंस्तोत्रंज्ञान विज्ञानदायकं॥सर्वपापंशमंयातिदत्तात्रेय न०॥१७॥इदंस्तोत्रंमहद्दिव्यंदत्तप्रत्यक्षका रकं॥दत्तात्रेयप्रसादाच्चनारदेनप्रकीर्तितं॥ १८॥ ॥इतिश्रीनारदपुराणेनारदविरचितंद त्तात्रेयस्तोत्रंसंपूर्णम्॥ ॥ ॥

इतिदत्तात्रेयस्तोत्रंसमाप्तं

---

## अथनारायणवर्मप्रारंभः

श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगु

रूभ्योनमः ॥ ॥राजोवाच ॥ ॥ययागुप्तःस
हस्राक्षःसवाहान्‌रिपुसैनिकान्‌ ॥ क्रीडन्नि
वविनिर्जित्यत्रिलोक्याबुभुजेश्रियम्‌॥ १॥
भगवंस्तन्ममाख्याहिवर्मनारायणात्मकं ॥
यथाऽततायिनःशत्रून्‌येनगुप्तोऽजयन्मृधे
॥२॥ ॥श्रीशुकउवाच॥ ॥वृतःपुरोहितः
स्त्वाष्ट्रोमहेन्द्रायानुपृच्छते ॥नारायणाख्यं
वर्माहतदिहैकमनाःशृणु ॥३॥ ॥विश्वरूप
उवाच॥ ॥धौताङ्घ्रिपाणिराचम्यसपवित्रउ
दङ्मुखः ॥ कृतस्वाङ्गकरन्यासोमंत्राभ्यांवा
ग्यतःशुचिः॥ ४॥नारायणमयंवर्मसन्नह्येद्‌
भयआगते॥पादयोर्जानुनोरूर्वोरुदरेहृद्यथो
रसि ॥ ५॥ मुखेशिरस्यानुपूर्व्यादोंकारादीनि
विन्यसेत्‌ ॥नमोनारायणायेतिविपर्ययमथा
पिवा ॥ ६॥करन्यासंततःकुर्यात्‌द्वादशाक्षर

विद्यया ॥ प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ॥७॥ न्यसेन्हृदयमोंकारं विकारमनुमूर्धनि ॥ षकारंतुभ्रुवोर्मध्येणकारंशिखयादिशेत् ॥ ८ ॥ वेकारंनेत्रयोर्युंज्यान्नकारंसर्वसंधिषु ॥ मकारमस्त्रमुद्दिश्यमंत्रमूर्तिर्भवेद्बुधः ॥ ९ ॥ सविसर्गंफडंतंतत्सर्वदिक्षुविनिर्दिशेत् ॥ ओंविष्णवेनमइति ॥ आत्मानंपरमंध्यायेद्ध्येयंषट्शक्तिभिर्युतम् ॥ विद्यातेजस्तपोमूर्तिमिमंमंत्रमुदाहरेत् ॥ १० ॥ हरिर्विदध्यान्ममसर्वरक्षांन्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे ॥ दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः ॥ ११ ॥ जलेषुमांरक्षतुमत्स्यमूर्तिर्यादोगणेभ्योवरुणस्यपाशात् ॥ स्थलेषुमायावटुवामनोऽव्यात्त्रिविक्रमः खेवतुविश्वरूपः ॥ १२ ॥ दुर्गेष्वटव्याजिमुखादिषुप्रभुः पायान्नृसिंहोऽसुरयूथ

पारिः॥विमुंचतोयस्यमहाट्टहासंदिशोविनेदु
र्न्यपतंश्चगर्भाः॥१३॥रक्षत्वसौमाऽध्वनिय
ज्ञकल्पःस्वदंष्ट्रयोन्नीतधरोवराहः॥रामोऽ
द्रिकूटेष्वथविप्रवासेसलक्ष्मणोऽव्याद्भरता
ग्रजोऽस्मान्॥१४॥मामुग्रधर्मादखिलात्प्रमा
दान्नारायणःपातुनरश्चहासात्॥दत्तस्त्वयो-
गादथयोगनाथःपायाद्गुणेशःकपिलःकर्म्म
बंधात्॥१५॥सनत्कुमारोऽवतुकामदेवाद्धय
शीर्षमांपथिदेवहेलनात्॥देवर्षिवर्यःपुरुषा
र्चनांतरात्कूर्मोहरिर्मांनिरयादशेषात्॥१६॥
धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वाद्भयादृषभो
निर्जितात्मा॥यज्ञश्चलोकादवताज्जनांताद्ब
लोगणात्क्रोधवशादहींद्रः॥१७॥द्वैपायनो
भगवानप्रबोधाद्बुद्धस्तुपाखंडगणात्प्रमा-
दात्॥कल्किःकलेःकालमलात्प्रपातुधर्माव-

नायोरुकृतावतारः ॥१८॥ मांकेशवोगदयाप्रा
तरव्याद्गोविंद आसंगवमात्तवेणुः ॥ नारायणः
प्राण्हउदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः
॥१९॥ देवोपराण्हेमधुहोग्रधन्वासायंत्रिधामाः
वतुमाधवोमाम् ॥ दोषेह्रषीकेशउतार्धरात्रे
निशीथएकोऽवतुपद्मनाभः ॥२०॥ श्रीवत्सधा
माऽपररात्रईशः प्रत्यूषईशोऽसिधरोजनार्दनः
॥ दामोदरोऽव्यादनुसंध्यंप्रभाते विश्वेश्वरोभ
गवान्कालमूर्तिः ॥२१॥ चक्रंयुगांतानलति-
ग्मनेमि भ्रमत्समंताद्भगवत्प्रयुक्तम् ॥ दंदग्धि
दंदग्ध्यरिसैन्यमाशुकक्षंयथावातसखोहुता
शः ॥२२॥ गदेशनिस्पर्शनविस्फुलिंगेनिष्पिंढि
निष्पिंढ्यजितप्रियाऽसि ॥ कूष्मांडवैनायकयक्षर
क्षोभूतग्रहांश्चूर्णयचूर्णयारीन् ॥२३॥ त्वंयातुधा
नप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥

दरेंद्रविद्रावयकृष्णापूरितोभीमस्वनोऽरेर्हृदया
निकंपयन्॥२४॥त्वंतिग्मधारासिवरारिसैन्य
मीशप्रयुक्तोममछिंधिछिंधि॥चक्षूंषिचर्म-
ञ्छतचंद्रछादयद्विषामघोनांहरपापचक्षुषाम्
॥२५॥यन्नोभयंग्रहेभ्योभूत्केतुभ्योनृभ्यएव-
च॥सरीसृपेभ्योदंष्ट्रिभ्यस्तथा अंहोभ्यएव-
वा॥२६॥सर्वाण्येतानिभगवन्नामरूपास्त्र-
कीर्तनात्॥प्रयांतुसंक्षयंसद्योयेनःश्रेयःप्र
तीपकाः॥२७॥गरुडोभगवांस्तोत्रस्तोभश्छं
दोमयःप्रभुः॥रक्षत्वशेषकृच्छ्रेभ्योविष्वक्
सेनःस्वनामभिः॥२८॥सर्वापद्भ्योहरेर्नाम-
रूपयानायुधानिनः॥बुद्धींद्रियमनःप्राणा-
न्पांतुपार्षदभूषणाः॥२९॥यथाहिभगवा-
नेववस्तुतःसदसच्चयत्॥सत्येनानेननःसर्वे
यांतुनाशमुपद्रवाः॥३०॥यथैकात्म्यानुभावानां

विकल्परहितःस्वयम्॥भूषणायुधलिंगाख्या
धत्तेशक्तीःस्वमायया॥३१॥तेनैवसत्यमानेन
सर्वज्ञोभगवान्हरिः॥पातुसर्वैःस्वरूपैर्नःसदा
सर्वत्रसर्वगः॥३२॥विदिक्षुदिक्षूर्ध्वमधःसमं
तादंतर्बहिर्भगवान्नारसिंहः॥प्रहापयँल्लो
कभयंस्वनेनस्वतेजसाग्रस्तसमस्ततेजाः॥
३३॥मघवन्निदमाख्यातंवर्मनारायणात्मकं॥
विजेष्यस्यंजसायेनदंशितोऽसुरयूथपान्॥
३४॥एतद्धारयमाणस्तुयंयंपश्यतिचक्षुषा॥
पदावासंस्पृशेत्सद्यःसाध्वसात्सविमुच्यते॥
३५॥नकुतश्चिद्भयंतस्यविद्यांधारयतोभवेत्॥
राजदस्युग्रहादिभ्योव्याघ्रादिभ्यश्चकर्हिचित्॥
३६॥इमांविद्यांपुराकश्चित्कौशिकोधारयन्
द्विजः॥योगधारणयास्वांगंजहौसमरुधन्व-
नि॥३७॥तस्योपरिविमानेनगंधर्वपतिरेक

दा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३८ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्शिराः ॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥ ३९ ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ ॥ श्रीशुक उवाच ॥ ॥ य इदं शृणुयात्काले यो धारयति चादृतः ॥ तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४० ॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥ ४१ ॥ ॥ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां वैय्यासिक्यां षष्ठस्कन्धे नारायणवर्मकथनं नाम अष्टमोऽध्यायः ॥ ८ ॥ ॥ ६ ॥ ॥ ५१ ॥ ॥

इति नारायणवर्म समाप्तम् ॥

# अथविष्णुपंजरस्तोत्रप्रारंभः

श्रीगणेशायनमः ॥ ॐ अस्यश्रीविष्णुपंजर स्तोत्रमंत्रस्य ॥ नारदऋषिः ॥ अनुष्टुप्छंदः ॥ श्रीविष्णुःपरमात्मादेवता ॥ अहंबीजं ॥ सोहं शक्तिः ॥ ॐ ह्रींकीलकं ॥ ममसर्वदेहरक्षणा-र्थेजपेविनियोगः ॥ नारदऋषयेनमःशिरसि ॥ अनुष्टुप्छंदसेनमःमुखे ॥ श्रीविष्णुपरमा-त्मदेवतायेनमःहृदये ॥ अहंबीजंगुह्ये ॥ सोहं शक्तिःपादयोः ॥ ॐ ह्रींकीलकंपादाग्रे ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः इतिमंत्रः ॥ ॐ ह्रांअंगुष्ठाभ्यां नमः ॥ ॐ ह्रींतर्जनीभ्यांनमः ॥ ॐ ह्रूंमध्यमा भ्यांनमः ॥ ॐ ह्रैं अनामिकाभ्यांनमः ॥ ॐ-ह्रौंकनिष्ठिकाभ्यांनमः ॥ ॐ ह्रः करतलकर पृष्ठाभ्यांनमः ॥ इतिकरन्यासः ॥ ॐ ह्रांहृद यायनमः ॥ ॐ ह्रीं शिरसेस्वाहा ॥ ॐ-ह्रूं-

शिखायैवषट् ॥ ॐ ह्रैं कवचायहुं ॥ ॐ ह्रौं ने
त्रत्रयायवौषट ॥ ॐ ह्रः अस्त्रायफट् ॥ इ-
तिअंगन्यासः ॥ अहंबीजंप्राणायामंमंत्रत्र
येणाकुर्यात् ॥ अथध्यानं ॥ परंपरस्मात्प्रकृ
तेरनादिमेकंनिविष्टंबहुधागुहायां ॥ सर्वाल
यंसर्वचराचरस्थंनमामिविष्णुंजगदेकनाथं
॥ १ ॥ ॐ विष्णुपंजरकंदिव्यंसर्वदुष्टनिवार-
णं ॥ उग्रतेजोमहावीर्यंसर्वशत्रुनिकृंतनं ॥ २
॥ त्रिपुरंदह्यमानस्यहरस्यब्रह्मणोदितं ॥ त
दहंसंप्रवक्ष्यामिआत्मरक्षाकरंनृणां ॥ ३ ॥
पादौरक्षतुगोविंदोजंघेचैवत्रिविक्रमः ॥ ऊरू
मेकेशवः पातुकटिंचैवजनार्दनः ॥ ४ ॥ नाभिं
चैवाच्युतः पातुगुह्यंचैवतुवामनः ॥ उदरंप-
द्मनाभश्चपृष्ठंचैवतुमाधवः ॥ ५ ॥ वामपा-
र्श्वेस्थितोविष्णुर्दक्षिणेमधुसूदनः ॥ बाहो

वैंवासुदेवश्चहृदिदामोदरस्तथा ॥ ६ ॥ कंठंर
क्षतुवाराहःकृष्णश्चमुखमंडले ॥ माधवःक
र्णमूलेतुहृषीकेशश्चनासिके ॥ ७ ॥ नेत्रेनारा
यणोरक्षेल्ललाटेगरुडध्वजः ॥ कपोलौकेश-
वोरक्षेद्वैकुंठःसर्वतोदिशं ॥ ८ ॥ श्रीवत्सांकश्च
सर्वेषामंगानांभवरक्षकः ॥ पूर्वस्यांपुंडरीका
क्ष आग्नेय्यांश्रीधरस्तथा ॥ ९ ॥ दक्षिणेनर-
सिंहश्चनैर्ऋत्यांमाधवोवतु ॥ पुरुषोत्तमोमेवा
रुण्यांवायव्यांचजनार्दनः ॥ १० ॥ गदाधरस्तु
कौबेर्य्यांमीशान्यांपातुकेशवः ॥ आकाशेच
गदापातुपातालेचसुदर्शनं ॥ ११ ॥ सन्नद्धःस
र्वगात्रेषुप्रविष्टोविष्णुपंजरः ॥ विष्णुपंजर-
विष्टोहंविचरामिमहीतले ॥ १२ ॥ राजद्वारेप
थेघोरेसंग्रामेशत्रुसंकटे ॥ नदीषुचरणेचैव
चोरव्याघ्रभयेषुच ॥ १३ ॥ ग्रहसिंधप्रेतभूते-

षुभयंतस्यनजायते ॥ रक्षरक्षंमहादेवरक्ष
रक्षजनेश्वर ॥ १४ ॥ रक्षंतुदेवताः सर्वेब्रह्मावि
ष्णुमहेश्वराः ॥ जलेरक्षतुवाराहः स्थलेरक्ष
तुमाधवः ॥ १५ ॥ अटव्यांनारसिंहश्चसर्वतः
पातुकेशवः ॥ दिवारक्षतुमांसूर्योरात्रौरक्षतु
चंद्रमाः ॥ १६ ॥ पंथानंदुर्गमंरक्षेत्सर्वमेवज-
नार्दनः ॥ रोगविघ्नहतश्चैवब्रह्महागुरुतल्प-
गः ॥ १७ ॥ स्त्रीघ्नस्तबालघातीचसुरापीवृष
लीपतिः ॥ मुच्यतेसर्वपापेभ्योयः पठेन्नात्र-
संशयः ॥ १८ ॥ अपुत्रोलभतेपुत्रंधनार्थील
भतेधनं ॥ विद्यार्थीलभतेविद्यांमोक्षार्थी
लभतेगतिं ॥ १९ ॥ आपदोहरतेनित्यंविष्णु
स्तोत्रार्थसंपदा ॥ यस्त्विदंपठतेस्तोत्रंविष्णु
पंजरमुत्तमं ॥ २० ॥ मुच्यतेसर्वपापेभ्योविष्णु
लोकंसगच्छति ॥ गोसहस्रफलंतस्यवाज-

पेयशतानिच ॥ २१ ॥ अश्वमेधसहस्त्रेणफ
लंप्राप्नोतिमानवः ॥ सर्वकामंलभेदस्यपठ
नान्नात्रसंशयः ॥ २२ ॥ जलेविष्णुः स्थले-
विष्णुर्विष्णुः पर्वतमस्तके ॥ ज्वालामालाकु-
लेविष्णुः सर्वविष्णुमयंजगत् ॥ २३ ॥ ॥ इ-
तिश्रीब्रंह्मांडपुराणेइंद्रनारदसंवादेश्रीविष्णु
पंजरस्तोत्रंसंपूर्णम् ॥ २४ ॥ ॥ छ ॥ ॥

इति विष्णुपंजरस्तोत्रंसमाप्तं.

---

## अथनारायणस्तोत्रप्रारंभः

श्रीगणेशायनमः ॥ नारायणनारायणजय
गोविंदहरे ॥ नारायणनारायणजयगोपा-
लहरे ॥ धृ० ॥ करुणापारावारावरुणालयगं
भीरा ॥ नारायण० ॥ १ ॥ घननीरदसंकाशा
कृतकलिकल्मषनाशा ॥ नारायणना० ॥ २ ॥

॥ यमुनातीरविहाराधृतकौस्तुभमणिहारा ॥ नारायण० ॥ ३ ॥ पीतांबरपरिधानासुरकल्याणनिधाना ॥ नारायण० ॥ ४ ॥ मंजुलगुंजाभूषामायामानुषवेषा ॥ नारायण० ॥ ५ ॥ राधाऽधरमधुरसिकारजनीकरकुलतिलका ॥ नारायणनारायण० ॥ ६ ॥ मुरलीगानविनोदावेदस्तुतिभूपादा ॥ नारायणनारायण० ॥ ७ ॥ बर्हिनि बर्हापीडानटनाटकफणिक्रीडा ॥ नारायणनारायणजय० ॥ ८ ॥ वारिजभूषाभरणाराजिवरुक्मिणिरमणा ॥ नारायणनारायणज० ॥ ९ ॥ जलरुहदलनिभनेत्रा जगदारंभकसूत्रा ॥ नारायण नारायणज० ॥ १० ॥ पातकरजनीसंहर करुणालय मामुद्धर ॥ नारायणनारायण० ॥ ११ ॥ अघबकक्षयकंसारे केशवकृष्णमुरारे ॥ नारायणना

रायणजय० ॥१२॥ हाटकनिभपीतांबर अभयं कुरुमेमावर ॥ नारायण नारायण ० ॥ १३॥ दशरथराजकुमारा दानवमदसंहारा ॥ नारायणनारायणजय० ॥ १४ ॥ गोवर्धनगिरिरमणा गोपीमानसहरणा ॥ नारायणनारायण० ॥ १५ शरयूतीरविहारासज्जनऋषिमांदारा ॥ नारायणनारायणजय० ॥१६॥ विश्वामित्रमखत्राविविधपरासुचरित्रा ॥ नारायणनारायणजय०॥१७॥ ध्वजवज्रांकुशपादाधरणीसुतसहमोदा ॥ नारायण नारायणजय० ॥ १८ ॥ जनकसुताप्रतिपालाजयजयसंस्मृतिलीला ॥ नारायणनारायणजयगो०॥१९ ॥दशरथवाग्धृतिभारादंडकवनसंचारा ॥ नारायणनारायणजय० ॥२०॥ मुष्टिकचाणुरसंहारा मुनिमानसविहारा ॥ नारायणनारा

सणाजयगो ॥२१॥ वालीनिग्रहशौर्यवरसु
ग्रीवहितार्या ॥ नारायणनारायणाज० ॥ २२
॥मांमुरलीकरधीवरपालयपालयश्रीधर ॥
नारायणनारायणजयगोपा० ॥ २३ ॥जल
निधिबंधनधीरारावणकंठविदारा ॥ नाराय
णनारायणजयगो० ॥ २४ ॥ नाटंमददलना
ढ्यानदगुणविविधधनाढ्या ॥ नारायणना
रायणजयगो ॥२५॥ गौतमपत्नीपूजनकरु
णाधनअवलोकन ॥ नारायणनारायणजय
गोविंद० ॥ २६ ॥ संभ्रमसीताहारासाकेतपुर
विहारा ॥ नारायणनारायणजय० ॥ २७ ॥
अचलोद्धृतिचंचत्करभक्तानुग्रहतत्पर ॥ ना
रायणनारायणजयगो० ॥ २८ ॥ नैगमगान
विनोदारक्षःस्तनप्रल्हादा ॥ नारायणनाराय
ण० ॥२९॥ भारतियतिवरशंकरनामामृत

मखिलांतर ॥ नारायणनारायणजयगोविंद
हरे ॥ नारायणनारायणजयगोपालहरे ॥
३०॥ ॥इतिश्रीमच्छंकराचार्यविरचितंनाराय
णस्तोत्रंसंपूर्णम् ॥ ५ ॥ ॥ ५ ॥ ॥

इतिनारायणस्तोत्रंसमाप्तम्

---

## अथशालिग्रामस्तोत्रप्रारंभः

श्रीगणेशायनमः॥ ॥अस्यश्रीशालिग्राम-
स्तोत्रमंत्रस्य॥श्रीभगवान्ऋषिः॥ नाराय-
णोदेवता॥दैवीगायत्रीछंदः॥शालिग्रामस्तो
त्रमंत्रजपेविनियोगः॥ ॥युधिष्ठिरउवाच॥
॥श्रीदेवदेवदेवेशदेवतार्चनमुत्तमं॥ तत्सर्वंश्रो
तुमिच्छामिब्रूहिमेपुरुषोत्तम॥१॥ ॥श्रीभग-
वानुवाच॥ ॥गंडक्यांचोत्तरेतीरे गिरिराजस्य-
दक्षिणे॥ दशयोजनविस्तीर्णामहाक्षेत्रवसं

धरा ॥२॥ शालिग्रामोद्भवोदेवोदेवाद्वारावती भवः ॥ उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः ॥३॥ शालिग्रामशिलायत्रयत्रद्वारावतीशिला ॥ उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः ॥४॥ आजन्मकृतपापानांप्रायश्चित्तंयदीच्छति ॥ शालिग्रामशिलावारिपापहारिनेसंशयः॥५॥ अकालमृत्युहरणंसर्वव्याधिविनाशनं ॥ विष्णोःपादोदकंपीत्वाशिरसाधारयाम्यहं ॥६॥ शंखमध्येस्थितंतोयंभ्रामितंकेशवोपरि ॥ अंगलग्नंमनुष्याणांब्रह्महत्यादिकंदहेत् ॥७॥ स्नानोदकंपिबेन्नित्यंचक्रांकितशिलोद्भवं ॥ प्रक्षाल्यशुद्धितत्तोयंब्रह्महत्याव्यपोहति ॥८॥ अग्निष्टोमसहस्राणांवाजपेयशतस्यच ॥ सम्यक्फलमवाप्नोतिविष्णोर्नैवेद्यभक्षणात् ॥९॥ नैवेद्यशेषंतुलसीवि

मिश्रितं विशेषतः पादजलेनविष्णोः ॥ योश्ना
तिनित्यंपुरतोमुरारेः प्राप्नोतियज्ञायुतकोटिपु
ण्यं ॥ १० ॥ खंडितास्फुटिताभिन्ना अग्निदग्धा
तथैवच ॥ शालिग्रामशिलायत्रतत्रदोषोनवि
द्यते ॥ ११ ॥ नमंत्रः पूजनंचैवनतीर्थंचनभाव
ना ॥ नस्तुतिर्नोपचारश्चशालिग्रामशिलार्चने
॥ १२ ॥ ब्रह्महत्यादिकंपापंमनोवाक्कायसंभवं
॥ शीघ्रंनश्यतितत्सर्वंशालिग्रामशिलार्चनात्
॥ १३ ॥ नानावर्णमयंचैवनानाभोगेनवेष्टितं
॥ तथावरप्रसादेनलक्ष्मीकांतंवदाम्यहं ॥ १४
॥ नारायणोद्भवोदेवश्चक्रमध्येचकर्मणा ॥ त
थावरप्रसादेनलक्ष्मीकांतंवदाम्यहं ॥ १५ ॥
कृष्णोशिलातलेयत्रसूक्ष्मंचक्रंहृदृश्यते ॥
सौभाग्यसंततिंधत्तेसर्वसौख्यंददातिच ॥ १६
॥ वासुदेवस्यचिन्हानिदृष्ट्वापापैःप्रमुच्यते ॥

श्रीधरः स्तुकरेवामेहरिद्वर्णस्तुदृश्यते ॥१७॥
वाराहरूपिणंदेवंकूर्मांगेरपिचिन्हितं ॥ गो-
पदंतत्रदृश्येतवाराहंवामनंतथा ॥१८॥ पीत
वर्णस्तुदेवानांरक्तवर्णभयावहं ॥ नरसिंहोभ
वेद्देवोमोक्षदंचप्रकीर्त्तितं ॥ १९॥ शंखचक्रग
दाकूर्माः शंखोयत्रप्रदृश्यते ॥ शंखवर्णस्यदे
वानांवामदेवस्यलक्षणं ॥२०॥ दामोदरंतथा
स्थूलंमध्येचक्रंप्रतिष्ठितं ॥ पूर्णद्वारेणसंकी
र्णापीतरेखाचदृश्यते ॥२१॥ छत्राकारेभवे
द्राज्यंवर्त्तुलेचमहाश्रियः ॥ चपटेचमहद्दुःखं
शूलाग्रेतुरणंध्रुवं ॥२२॥ ललाटेशेषभोगस्तु
शिरोपरिसुकांचनं ॥ चक्रकांचनवर्णानां वाम
देवस्यलक्षणं ॥२३॥ वामपार्श्वेचवैचक्रे कृष्णा
वर्णस्तुपिंगलं ॥ लक्ष्मीनृसिंहदेवानांपृथग्वर्ण
स्तुदृश्यते ॥२४॥ लंबोष्ठेचदरिद्रंस्यात्पिंगले-

हानिरेवच ॥ लग्नचक्रे भवेद्व्याधिर्विदारे मरणं ध्रुवं ॥२५॥ पादोदकंच निर्माल्यं मस्तके धारये त्सदा ॥ विष्णोर्दृष्टं भक्षितव्यं तुलसीदलमिश्रि तं ॥२६॥ कल्पकोटिसहस्राणि वैकुंठे वसते सदा ॥ शालिग्रामशिलाबिंदुर्हत्याकोटि वि- नाशनः ॥२७॥ तस्मात्संपूजयेद्ध्यात्वा पूजि तंचापि सर्वदा ॥ शालिग्रामशिलास्तोत्रं यः पठेच्च द्विजोत्तमः ॥२८॥ सगच्छेत्परमंस्थानं यत्र लोकेश्वरो हरिः ॥ सर्वपापविनिर्मुक्तो वि ष्णुलोकं सगच्छति ॥२९॥ दशावतारो देवा- नां पृथग्वर्णस्तु दृश्यते ॥ ईप्सितं लभते राज्यं विष्णुपूजामनुक्रमात् ॥ ३०॥ कोट्यो हि ब्र- ह्महत्यानामगम्यागम कोटयः ॥ ते सर्वे ना शमायांति विष्णुनैवेद्यभक्षणात् ॥३१॥ - विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनं

॥ तस्मादष्टगुणंपापंभूमौबिंदुनिपातनात्
॥ ३२ ॥ ॥इतिश्रीभविष्योत्तरपुराणेगंड-
कीशिलामाहात्म्येश्रीकृष्णयुधिष्ठिरसंवादे
शालिग्रामस्तोत्रंसंपूर्णम् ॥ ॥श्रीकृष्णा० ॥
इतिशालिग्रामस्तोत्रंसमाप्तं

---

## अथतुलसीकवचप्रारंभः

श्रीगणेशायनमः ॥ ॥तुलसिश्रीसखिशुभे
पापहारिणिपुण्यदे ॥नमस्तेनारदनुतेनाराय
णमनःप्रिये ॥१॥ अस्यश्रीतुलसीकवचस्तो
त्रमंत्रस्य ॥ श्रीमहादेवऋषिः॥ अनुष्टुप्छं
दः ॥श्रीतुलसीदेवता॥ ममेप्सितकामना-
सिद्ध्यर्थेजपेविनियोगः॥ तुलसिश्रीमहादे
विनमःपंकजधारिणि ॥शिरोमेतुलसीपातु
भालंपातुयशस्विनी ॥१॥ दृशौमेपद्मनयना

श्रीसरखीश्रवणेमम ॥ घ्राणंपातुसुगंधामेसु
खंचसुमुखीमम ॥ २ ॥ जिव्हांमेपातुशुभदा
कंठंविद्यामयीमम ॥ स्कंधौकल्हारिणीपातु-
र्हृदयंविष्णुवल्लभा ॥ ३ ॥ पुण्यदामेपातुम-
ध्यंनाभिंसौभाग्यदायिनी ॥ कटिंकुंडलिनी-
पातुऊरूनारदवंदिता ॥ ४ ॥ जननीजानुनीपा
तुजंघेसकलवंदिता ॥ नारायणप्रियापादौस
र्वांगंसर्वरक्षिणी ॥ ५ ॥ संकटेविषमेदुर्गेभये-
वादेमहाहवे ॥ नित्यंहिसंध्ययोःपातुतुलसी
सर्वतःसदा ॥ ६ ॥ इतीदंपरमंगुह्यंतुलस्याः
कवचामृतम् ॥ मर्त्यानाममृतार्थायभीताना-
मभयायच ॥ ७ ॥ मोक्षायचमुमुक्षूणांश्री-
कामानांश्रियैतथा ॥ विजयायमुमुक्षूणांध्या
यिनांध्यानयोगकृत् ॥ ८ ॥ वशायवश्यकामा
नांविद्यायैवेदवादिनां ॥ द्रविणायदरिद्राणां

पापिनांपापशांतये ॥ ९ ॥ अन्नायक्षुधिना
नांचस्वर्गायस्वर्गमिच्छताम् ॥ पशव्यंपशु-
कामानांपुत्रदंपुत्रकांक्षिणाम् ॥ १० ॥ राज्याय
भ्रष्टराज्यानामशांतानांचशांतये ॥ भक्त्यर्थं
विष्णुभक्तानांविष्णौसर्वांतरात्मनि ॥ ११ ॥ जा
प्यंत्रिवर्गसिद्ध्यर्थंगृहस्थेनविशेषतः ॥ उद्यं
तंचंडकिरणमुपस्थायकृतांजलिः ॥ १२ ॥ तु
लसीकाननेतिष्ठन्नासीनोवाजपेदिदं ॥ स-
र्वान्कामानवाप्नोतितथैवममसन्निधिम् ॥ १३
॥ ममप्रियकरंनित्यंहरिभक्तिविवर्धनं ॥ या
स्यान्मृतप्रजानारीतस्या अंगंप्रमार्जयेत् ॥
१४ ॥ सापुत्रंलभतेदीर्घजीविनंचाप्यरोगि-
णाम् ॥ वंध्यायामार्जयेदंगंकुशैर्मंत्रेणसाध
कः ॥ १५ ॥ सापिसंवत्सरादेवगर्भंधत्तेमनोह
रं ॥ अश्वत्थेराजवश्यार्थीजपेदग्नेःसुरूप

भाक् ॥१६॥ पलाशमूलेविद्यार्थीतेजोर्थ्यभि
मुखोरवेः ॥ कन्यार्थीचंडिकागेहे शत्रुहत्यै गृहे
मम ॥१७॥ श्रीकामोविष्णुगेहे चउद्यानेस्त्री
वशोभवेत् ॥ किमत्रबहुनोक्तेनशृणुसैन्येश शा
नतः ॥१८॥ यंयंकाममभिध्याये त्तंतंमाप्नो
त्यसंशयं ॥ ममगेहगतस्त्वंतु तारकस्यवधे-
च्छया ॥ जपेत्स्तोत्रंचकवचंतुलसीगतमान
सः ॥ मंडलात्तारकंहंताभविष्यतिनसंशयः
॥२०॥ इतिश्रीब्रह्मांडपुराणेतुलसी माहा-
त्म्येतुलसीकवचंनामद्वितीयोध्यायः ॥२॥
इतितुलसीकवचंनामसमाप्तं.

---

## अथतुलसीस्तोत्रप्रारंभः

श्रीगणेशायनमः ॥ ॥ जगद्धात्रिनमस्तुभ्यं
विष्णोश्चप्रियवल्लभे ॥ यतोब्रह्मादयोदेवाः

सृष्टिस्थित्यंतकारिण: ॥ १ ॥ नमस्तुलसिक
ल्याणिनमोविष्णुप्रियेशुभे ॥ नमोमोक्षप्रदे
देविनमः संपत्प्रदायके ॥ २ ॥ तुलसीपातुमां
नित्यंसर्वापद्भ्योपिसर्वदा ॥ कीर्तितापिस्मृ-
तावापिपवित्रयतिमानवं ॥ ३ ॥ नमामिशि
रसादेवींतुलसींविलसत्तनुं ॥ यांदृष्ट्वापापि
नोमर्त्यामुच्यंतेसर्वकिल्बिषात् ॥ ४ ॥ तुल-
स्यारक्षितंसर्वंजगदेतच्चराचरं ॥ याविनिर्ह
तिपापानिदृष्टावापापिभिर्नरैः ॥ ५ ॥ नमस्तु
लस्यतितरांयस्यैबद्ध्वाबलिंकलौ ॥ कलयं
तिसुखंसर्वेस्त्रियोवैश्यास्तथापरे ॥ ६ ॥ तु
लस्यानापरंकिंचिद्दैवतंजगतीतले ॥ यथाप
वित्रितोलोकोविष्णुसंगेनवैष्णवः ॥ ७ ॥ तुल
स्याःपल्लवंविष्णोःशिरस्यारोपितंकलौ ॥-
आरोपयतिसर्वाणिश्रेयांसिनरमस्तके ॥ ८

॥तुलस्यांसकलादेवावसंतिसततंयतः ॥ अ-
तस्तामर्चयेल्लोकेसर्वान्देवान्समर्चयन् ॥ ९
॥नमस्तुलसिसर्वज्ञेपुरुषोत्तमवल्लभे ॥ पा-
हिमांसर्वपापेभ्यःसर्वसंपत्प्रदायके ॥ १० ॥इ
तिस्तोत्रंपुरागीतंपुंडरीकेणधीमता ॥ विष्णु
मर्चयतानित्यंशोभनैस्तुलसीदलैः ॥ ११ ॥तु
लसीश्रीमहालक्ष्मीर्विद्याविद्यायशस्विनी ॥
धर्म्याधर्माननादेवीदेवदेवमनःप्रिया ॥ १२॥
लक्ष्मीःप्रियसखीदेवीद्यौर्भूमिरचलाचला ॥
षोडशैतानिनामानितुलस्याःकीर्तयेन्नरः ॥
१३॥ लभतेसुतरांभक्तिमंतेविष्णुपदंलभेत्
॥ तुलसीभूर्महालक्ष्मीःपद्मिनीश्रीहरिप्रिया
॥ १४ ॥ तुलसीश्रीसखिशुभेपापहारिणिपु
ण्यदे ॥ नमस्तेनारदनुतेनारायणमनःप्रिये॥
१५ ॥ इतिश्रीपुंडरीककृतंतुलसीकवचंसमाप्तं ॥

# अथरामरक्षास्तोत्रप्रारंभः

श्रीगणेशायनमः॥ ॥श्रीसीतारामचंद्राभ्यां
नमः॥ ॥अस्यश्रीरामरक्षास्तोत्रमंत्रस्य॥बु
धकौशिकऋषिः॥ श्रीसीतारामचंद्रोदेवता॥
अनुष्टुप्छंदः॥ सीताशक्तिः॥ श्रीमद्धनूमान्
कीलकं॥ श्रीरामचंद्रप्रीत्यर्थेरामरक्षास्तोत्र-
जपेविनियोगः॥ ॥अथध्यानम्॥ ॥ध्या
येदाजानुबाहुं धृतशरधनुषंबद्धपद्मासनस्थं
पीतंवासोवसानंनवकमलदलस्पर्धिनेत्रंप्रस
न्नम्॥वामांकारूढसीतामुखकमलमिलल्लो
चनंनीरदाभंनानालंकारदीप्तंदधतमुरजटाम
ण्डनंरामचंद्रम्॥१॥ ॥इतिध्यानं॥ ॥चरि
तंरघुनाथस्यशतकोटिप्रविस्तरम्॥एकैकम
क्षरंपुंसांमहापातकनाशनम्॥१॥ध्यात्वा-
नीलोत्पलश्यामंरामंराजीवलोचनम्॥जा

नकीलक्ष्मणोपेतंजटामुकुटमंडितम् ॥ २॥
सासितूणंधनुर्बाणपाणिंनक्तंचरांतकम् ॥ स्व
लीलयाजगत्त्रातुमाविर्भूतमजंविभुम् ॥ ३॥
रामरक्षांपठेत्प्राज्ञः पापघ्नींसर्वकामदाम् ॥
शिरोमेराघवः पातुभालंदशरथात्मजः ॥ ४
कौसल्येयोदृशौ पातुविश्वामित्रप्रियःश्रुती ॥ घ्रा
णंपातुमखत्रातामुखंसौमित्रिवत्सलः ॥ ५॥
जिह्वांविद्यानिधिः पातुकंठंभरतवंदितः ॥ स्कं
धौदिव्यायुधःपातुभुजौभग्नेशकार्मुकः ॥ ६॥
करौसीतापतिः पातुहृदयंजामदग्न्यजित् ॥
मध्यंपातुखरध्वंसीनाभिंजांबवदाश्रयः ॥
७॥ सुग्रीवेशः कटिंपातुसक्थिनीहनुमत्प्रभुः
॥ ऊरूरघूत्तमः पातुरक्षःकुलविनाशकृत् ॥
८॥ जानुनीसेतुकृत्पातुजंघेदशमुखांतकः ॥
पादौबिभीषणश्रीदः पातुरामोखिलंवपुः ॥

९ ॥ एतांरामबलोपेतांरक्षांयःसुकृतीपठे
त् ॥ सचिरायुःसुखीपुत्रीविजयीविनयीभ
वेत् ॥ १० ॥ पातालभूतलव्योमचारिणश्छद्म
चारिणः ॥ नद्रष्टुमपिशक्तास्तेरक्षितंरामनाम
भिः ॥ ११ ॥ रामेतिरामभद्रेतिरामचंद्रेतिवास्म
रन् ॥ नरोनलिप्यतेपापैर्भुक्तिंमुक्तिंचविंदति ॥
१२ ॥ जगज्जैत्रैकमंत्रेणरामनाम्नाभिरक्षितम् ॥
यःकंठेधारयेत्तस्यकरस्थाःसर्वसिद्धयः ॥ १३
॥ वज्रपंजरनामेदंयोरामकवचंस्मरेत् ॥ अ-
व्याहताज्ञःसर्वत्रलभतेजयमंगलं ॥ १४ ॥-
आदिष्टवान्यथास्वप्नेरामरक्षामिमांहरः ॥ त
थालिखितवान्प्रातःप्रबुद्धोबुधकौशिकः ॥
१५ ॥ आरामःकल्पवृक्षाणांविरामःसकला
पदाम् ॥ अभिरामस्त्रिलोकानांरामःश्रीमा
न्सनःप्रभुः ॥ १६ ॥ तरुणौरूपसंपन्नौसुकु

मारौमहाबलौ ॥ पुंडरीकविशालाक्षौचीरकृष्णा
जिनांबरौ ॥१७॥ फलमूलाशिनौदांतौतापसौ
ब्रह्मचारिणौ ॥ पुत्रौदशरथस्यैतौभ्रातरौराम
लक्ष्मणौ ॥१८॥ शरण्यौसर्वसत्वानांश्रेष्ठौसर्व
धनुष्मताम् ॥ रक्षःकुलनिहंतारौत्रायेतांनो-
रघूत्तमौ ॥१९॥ आत्तसज्जधनुषाविषुस्पृशा
वक्षयाशुगनिषंगसंगिनौ ॥ रक्षणायममरा-
मलक्ष्मणावग्रतःपथिसदैवगच्छताम् ॥२०॥-
सन्नद्धःकवचीखड्गीचापबाणधरोयुवा ॥ ग-
च्छन्मनोरथोस्माकंरामःपातुसलक्ष्मणः ॥२१
रामोदाशरथिःशूरोलक्ष्मणानुचरोबली ॥का
कुत्स्थःपुरुषःपूर्णःकौसल्येयोरघूत्तमः ॥२२
॥ वेदांतवेद्योयज्ञेशःपुराणपुरुषोत्तमः ॥ जान
कीवल्लभःश्रीमानप्रमेयपराक्रमः ॥२३॥ इत्ये
तानिजपेन्नित्यंमद्भक्तःश्रद्धयान्वितः ॥ अश्व

मेधायुतं पुण्यं संप्राप्नोतिनसंशयः ॥२४॥
रामंदूर्वादलश्यामंपद्माक्षंपीतवाससम् ॥ स्तु
वंतिनामभिर्दिव्यैर्नतेसंसारिणोनराः ॥२५॥
रामंलक्ष्मणपूर्वजंरघुवरंसीतापतिंसुंदरंका
कुत्स्थंकरुणार्णवंगुणनिधिंविप्रप्रियंधार्मि
कम् ॥ राजेंद्रंसत्यसंधंदशरथतनयंश्यामलं
शांतमूर्तिंवंदेलोकाभिरामंरघुकुलतिलकंराघ
वंरावणारिम् ॥२६॥ रामायरामभद्रायराम
चंद्रायवेधसे ॥ रघुनाथायनाथायसीतायाः
पतयेनमः ॥२७॥ श्रीरामरामरघुनंदनरामरा
मश्रीरामरामभरताग्रजरामराम ॥ श्रीरामरा
मरणकर्कशरामराम श्रीरामरामशरणंभवरा
मराम ॥२८॥ श्रीरामचंद्रचरणौमनसास्म
रामिश्रीरामचंद्रचरणौवचसागृणामि ॥ श्रीरा
मचंद्रचरणौशिरसानमामिश्रीरामचंद्रचरणौ

शरणंप्रपद्ये ॥ २९ ॥ मातारामोमत्पितारामचं
द्रः स्वामीरामोमत्सखारामचंद्रः ॥ सर्वस्वंमेरा
मचंद्रोदयालुर्नान्यंजानेनैवजानेनजाने ॥ ३० ॥
दक्षिणेलक्ष्मणोयस्य वामेचजनकात्मजा ॥
पुरतोमारुतिर्यस्य तंवंदेरघुनंदनम् ॥ ३१ ॥ लो
काभिरामंरणरंगधीरंराजीवनेत्रंरघुवंशना-
थम् ॥ कारुण्यरूपंकरुणाकरंतंश्रीरामचंद्रं-
शरणंप्रपद्ये ॥ ३२ ॥ मनोजवंमारुततुल्यवेगं
जितेंद्रियंबुद्धिमतांवरिष्ठम् ॥ वातात्मजंवानर
यूथमुख्यंश्रीरामदूतंशरणंप्रपद्ये ॥ ३३ ॥ कू
जंतंरामरामेतिमधुरंमधुराक्षरम् ॥ आरुह्यक
विताशाखांवंदेवाल्मीकिकोकिलं ॥ ३४ ॥ आ
पदामपहर्तारंदातारंसर्वसंपदाम् ॥ लोकाभि
रामंश्रीरामंभूयोभूयोनमाम्यहम् ॥ ३५ ॥ भ
र्जनंभवबीजानामर्जनंसुखसंपदाम् ॥ तर्ज

नंयमदूतानांरामरामेतिगर्जनं ॥३६॥रामो
राजमणिः सदाविजयतेरामंरमेशंभजेरामे-
णाभिहतानिशाचरचमूरामायतस्मैनमः॥
रामान्नास्तिपरायणंपरतरंरामस्यदासो ऽ-
स्म्यहंरामेचित्तलयः सदाभवतुमेभोराममा
मुद्धर ॥३७॥ रामरामेतिरामेतिरमेरामेमनो
रमे ॥ सहस्रनामतत्तुल्यं रामनामवरानने ॥
३८॥ ॥इतिश्रीबुधकौशिकविरचितंश्रीरा
मरक्षास्तोत्रंसंपूर्णम्॥ ॥७॥ ॥७॥

इतिरामरक्षास्तोत्रंसमाप्तम्

---

अथरामस्तवराजः प्रारभ्यते

श्रीगणेशायनमः॥ ॥ओम्॥ अस्यश्रीराम
चंद्रस्तवराजस्तोत्रमंत्रस्य ॥ सनत्कुमारऋ-
षिः॥ अनुष्टुपछंदः ॥ श्रीरामोदेवता ॥ सीता

बीजं ॥ हनुमान् शक्तिः ॥ श्रीरामप्रीत्यर्थे ज
पे विनियोगः ॥ ॥ सूत उवाच ॥ ॥ सर्वशा
स्त्रार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् ॥ धर्मपु
त्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥१॥ ॥
युधिष्ठिर उवाच ॥ ॥ भगवन् योगिनां श्रेष्ठ स
र्वशास्त्रविशारद ॥ किं तत्त्वं किं परं जाप्यं किं
ध्यानं मुक्तिसाधनम् ॥२॥ श्रोतुमिच्छामि त
त्सर्वं ब्रूहि मे मुनिसत्तम ॥ ॥ वेदव्यास उवाच ॥
॥ धर्मराज महाभाग शृणु वक्ष्यामि तत्त्वतः ॥३
॥ यत्परं यद्गुणातीतं यज्ज्योतिरमलं शिवम् ॥
तदेव परमं तत्त्वं कैवल्यपदकारणम् ॥४॥ श्री
रामेति परं जाप्यं तारकं ब्रह्मसंज्ञकम् ॥ ब्रह्मह
त्यादिपापघ्नमिति वेदविदो विदुः ॥५॥ श्रीरा
म रामेति जना ये जपन्ति च सर्वदा ॥ तेषां भुक्ति
श्च मुक्तिश्च भविष्यति न संशयः ॥६॥ स्तवरा

जंपुराप्रोक्तंनारदेनचधीमता ॥ तत्सर्वंसंप्रव
क्ष्यामिहरिध्यानपुरःसरम् ॥ ७ ॥ तापत्रयाग्नि
शमनंसर्वाघौघनिकृंतनम् ॥ दारिद्र्यदुःखश
मनंसर्वसंपत्करंशिवम् ॥ ८ ॥ विज्ञानफलदं-
दिव्यंमोक्षैकफलसाधनम् ॥ नमस्कृत्यप्रव-
क्ष्यामिरामंकृष्णंजगन्मयम् ॥ ९ ॥ अयोध्या
नगरेरम्येरत्नमंडपमध्यगे ॥ स्मरेत्कल्पतरोर्मू
लेरत्नसिंहासनंशुभम् ॥ १० ॥ तन्मध्येऽष्टदलं
पद्मंनानारत्नैश्चवेष्टितम् ॥ स्मरेन्मध्येदाशर
थिंसहस्रादित्यतेजसम् ॥ ११ ॥ पितुरंकगतं
राममिंद्रनीलमणिप्रभम् ॥ कोमलांगंविशा-
लाक्षंविद्युद्वर्णांबरावृतम् ॥ १२ ॥ भानुकोटि
प्रतीकाशंकिरीटेनविराजितम् ॥ रत्नग्रैवेयके
यूरंरत्नकुंडलमंडितम् ॥ १३ ॥ रत्नकंकणमं-
जीरंकटिसूत्रैरलंकृतम् ॥ श्रीवत्सकौस्तुभोरं

स्कंमुक्ताहारोपशोभितम् ॥१४॥ दिव्यरत्न-
समायुक्तंमुद्रिकाभिरलंकृतम् ॥ राघवंद्विभु
जंबालंराममीषत्स्मितानननं ॥१५॥ तुलसीकुं
दमंदारपुष्पमाल्यैरलंकृतम् ॥ कर्पूरागुरुक-
स्तूरीदिव्यगंधानुलेपनम् ॥१६॥ योगशास्त्रे
ष्वभिरतंयोगीशंयोगदायकम् ॥ सदाभरत-
सौमित्रिशत्रुघ्नैरुपशोभितम् ॥१७॥ विद्याध
रसुराधीशसिद्धगंधर्वकिन्नरैः॥ योगींद्रैर्ना-
रदाद्यैश्चस्तूयमानमहर्निशम् ॥१८॥ विश्वा
मित्रवसिष्ठादिमुनिभिःपरिसेवितम् ॥ सन
कादिमुनिश्रेष्ठैर्योगिवृंदैश्चसेवितम् ॥१९॥-
रामंरघुवरंवीरंधनुर्वेदविशारदम् ॥ मंगलाय
तनंदेवंरामंराजीवलोचनम् ॥२०॥ सर्वशा-
स्त्रार्थतत्त्वज्ञमानंदकरसुंदरम् ॥ कौसल्यानं
दनंरामंधनुर्बाणधरंहरिं ॥२१॥ एवंसंचिंतय

न्विष्णुं यज्ज्योतिरमलंविभुं ॥ प्रहृष्टमानसोभू
त्वामुनिवर्यःसनारदः ॥ २२ ॥ सर्वलोकहि
तार्थायतुष्टावरघुनंदनम् ॥ कृतांजलिपुटो
भूत्वाचिंतयनद्भुतंहरिम् ॥ २३ ॥ यदेकंयत्प-
रंनित्यंयदनंतंचिदात्मकम् ॥ यदेकंव्यापकं-
लोकेतद्रूपंचिंतयाम्यहम् ॥ २४ ॥ विज्ञानहे
तुंविमलायताक्षं प्रज्ञानरूपंस्वसुखैकहेतु-
म् ॥ श्रीरामचंद्रंहरिमादिदेवंपरात्परंराम-
महंभजामि ॥ २५ ॥ कविंपुराणंपुरुषंपुर
स्तात्सनातनंयोगिनमीशितारम् ॥ अणोर
णीयांसमनंतवीर्यंप्राणेश्वरंराममसौददर्श
॥ २६ ॥ ॥ नारदउवाच ॥ ॥ नारायणंजग
न्नाथमभिरामंजगत्पतिम् ॥ कविंपुराणं
वागीशंरामंदशरथात्मजम् ॥ २७ ॥ राजरा
जंरघुवरंकौसल्यानंदवर्धनम् ॥ भर्गंवरेण्यं

विश्वेशंरघुनाथंजगद्गुरुम् ॥ २८ ॥ सत्यंस
त्यप्रियंश्रेष्ठंजानकीवल्लभंविभुम् ॥ सौमि-
त्रिपूर्वजंशांतंकामदंकमलेक्षणम् ॥ २९ ॥ आ
दित्यंरविमीशानंघृष्णिंसूर्यमनामयम् ॥ आ
नंदरूपिणंसौम्यंराघवंकरुणामयम् ॥ ३० ॥
जामदग्न्यंतपोमूर्तिंरामंपरशुधारिणम् ॥ वा-
क्पतिंवरदंवाच्यंश्रीपतिंपक्षिवाहनम् ॥ ३१
श्रीशार्ङ्गधारिणंरामंचिन्मयानंदविग्रहम् ॥
हलधृग्विष्णुमीशानंबलरामंकृपानिधिं ॥-
३२ ॥ श्रीवल्लभंकृपानाथंजगन्मोहनमच्युत
म् ॥ मत्स्यकूर्मवराहादिरूपधारिणमव्ययम्
॥ ३३ ॥ वासुदेवंजगद्योनिमनादिनिधनंहरिं
॥ गोविंदंगोपतिंविष्णुंगोपीजनमनोहरम् ॥
३४ ॥ गोगोपालपरीवारंगोपकन्यासमावृत
म् ॥ विद्युत्पुंजप्रतीकाशंरामंकृष्णंजगन्मय

म् ॥ ३५ ॥ गोगोपिकासमाकीर्णवेणुवादन
तत्परम् ॥ कामरूपंकलावंतंकामिनीकामदं
विभ्रम् ॥ ३६ ॥ मन्मथंमथुरानाथंमाधवं-
मकरध्वजम् ॥ श्रीधरंश्रीकरंश्रीशं श्रीनिवा
संपरात्परम् ॥ ३७ ॥ भूतेशंभूपतिंभद्रंविभू
तिंभूतिभूषणम् ॥ सर्वदुःखहरंवीरंदुष्टदान
ववैरिणम् ॥ ३८ ॥ श्रीनृसिंहंमहाबाहुंमहांतं
दीप्ततेजसम् ॥ चिदानंदमयंनित्यंप्रणवंज्यो
तिरूपिणम् ॥ ३९ ॥ आदित्यमंडलगतंनि-
श्चितार्थस्वरूपिणम् ॥ भक्तप्रियंपद्मनेत्रंभ
क्तानामीप्सितप्रदम् ॥ ४० ॥ कौसल्येयंक-
लामूर्तिंकाकुत्स्थंकमलाप्रियम् ॥ सिंहासने
समासीनंनित्यव्रतमकल्मषम् ॥ ४१ ॥ वि-
श्वामित्रप्रियंदांतंस्वदारनियतव्रतम् ॥ य
ज्ञेशंयज्ञपुरुषंयज्ञपालनतत्परम् ॥ ४२ ॥

सत्यसंधंजितक्रोधंशरणागतवत्सलं ॥ सर्व-
क्लेशापहरणंबिभीषणवरप्रदम् ॥ ४३ ॥ दश
ग्रीवहरंरौद्रंकेशवंकेशिमर्दनम् ॥ वालिप्रम-
थनंवीरंसुग्रीवेप्सितराज्यदम् ॥ ४४ ॥ नरवा
नरदेवैश्चसेवितंहनुमत्प्रियं ॥ शुद्धंसूक्ष्मंपरं
शांतंतारकंब्रह्मरूपिणम् ॥ ४५ ॥ सर्वभूता-
त्मभूतस्थंसर्वाधारंसनातनम् ॥ सर्वकारण
कर्त्तारंनिदानंप्रकृतेःपरम् ॥ ४६ ॥ निरामयं
निराभासंनिरवद्यंनिरंजनं ॥ नित्यानंदंनि-
राकारमद्वैतंतमसःपरम् ॥ ४७ ॥ परात्परत
रंतत्वंसत्यानंदंचिदात्मकम् ॥ मनसाशिरसा
नित्यंप्रणमामिरघूत्तमं ॥ ४८ ॥ सूर्यमंडलम
ध्यस्थंरामंसीतासमन्वितम् ॥ नमामिपुंडरी-
काक्षममेयंगुरुतत्परम् ॥ ४९ ॥ नमोस्तुवासु-
देवायज्योतिषांपतयेनमः ॥ नमोस्तुरामदेवा

यजगदानंदरूपिणे ॥ ५० ॥ नमोवेदांतनिष्ठा
ययोगिनेब्रह्मवादिने ॥ मायामयनिरस्ताय
प्रपन्नजनसेविने ॥ ५१ ॥ वंदामहेमहेशानचं
डकोदंडखंडनम् ॥ जानकीहृदयानंदवर्द्धनं
रघुनंदनं ॥ ५२ ॥ उत्फुल्लामलकोमलोत्पलद-
लश्यामायरामायतेकामायप्रमदामनोहरगुण
ग्रामायरामात्मने ॥ योगारूढमुनींद्रमानससं
रोहंसायसंसारविध्वंसायस्फुरदोजसेरघुकु-
लोत्तंसायपुंसेनमः ॥ ५३ ॥ भवोद्भवंवेदविदां
वरिष्ठमादित्यचंद्रानलसुप्रभावम् ॥ सर्वात्मकं
सर्वगतस्वरूपंनमामिरामंतमसःपरस्तात् ॥
५४ ॥ निरंजनंनिष्प्रतिमंनिरीहंनिराश्रयंनि
ष्कलमप्रपंचम् ॥ नित्यध्रुवंनिर्विषयस्वरूपं-
निरंतरंराममहंभजामि ॥ ५५ ॥ भवाब्धिपोतं
भरताग्रजंतंभक्तप्रियंभानुकुलप्रदीपं ॥ भूत

त्रिनाथं भुवनाधिपं तं भजामि रामं भवरोगवैद्यं ॥ ५६ ॥ सर्वाधिपत्यं समरांगधीरं सत्यं चिदानंदमयस्वरूपं ॥ सत्यं शिवं शांतिमयं शरण्यं सनातनं राममहं भजामि ॥ ५७ ॥ कार्यक्रियाकारणमप्रमेयं कविं पुराणं कमलायताक्षं ॥ कुमारवेद्यं करुणामयं तं कल्पद्रुमं राममहं भजामि ॥ ५८ ॥ त्रैलोक्यनाथं सरसीरुहाक्षं दयानिधिं द्वंद्वविनाशहेतुं ॥ महाबलं वेदनिधिं सुरेशं सनातनं राममहं भजामि ॥ ५९ ॥ वेदांतवेद्यं कविमीशितारमनादिमध्यांतमचिंत्यमाद्यं ॥ अगोचरं निर्मलमेकरूपं नमामि रामं तमसः परस्तात् ॥ ६० ॥ अशेषवेदात्मकमादिसंज्ञमजं हरिं विष्णुमनंतमाद्यम् ॥ अपारसंवित्सुखमेकरूपं परात्परं राममहं० ॥ ६१ ॥ तत्त्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकं

॥ राजाधिराजंरविमंडलस्थंविश्वेश्वरंराममहंभजामि ॥ ६२ ॥ लोकाभिरामंरघुवंशनाथं हरिंचिदानंदमयंमुकुंदम् ॥ अशेषविद्याधिपतिंकवींद्रंनमाभिरामंतमसः परस्तात् ॥ ६३ ॥ योगींद्रसंघैश्चसुसेव्यमानंनारायणंनिर्मलमादिदेवम् ॥ नतोस्मिनित्यंजगदेकनाथमादित्यवर्णंतमसः परस्तात् ॥ ६४ ॥ विभूतिदंविश्वसृजंविराजंराजेंद्रमीशंरघुवंशनाथं ॥ अचिंत्यमव्यक्तमनंतमूर्तिंज्योतिर्मयंराममहंभजामि ॥ ६५ ॥ अशेषसंसारविकारहीनमादित्यगंपूर्णसुखाभिरामं ॥ समस्तसाक्षिंतमसः परस्तान्नारायणंविष्णुमहंभजामि ॥ ६६ ॥ मुनींद्रगुह्यंपरिपूर्णकामंकलानिधिंकल्मषनाशहेतुं ॥ परात्परंयत्परमंपवित्रंनमामिरामंमहतोमहांतम् ॥ ६७ ॥ ब्रह्मा विष्णु

श्चरुद्रश्चदेवेंद्रोदेवतास्तथा ॥ आदित्यादिग्र
हांश्चैवत्वमेवरघुनंदन ॥ ६८ ॥ तापसाऋष-
यः सिद्धाः साध्याश्चमरुतस्तथा ॥ विद्यावेदा
स्तथायज्ञाः पुराणंधर्मसंहिता ॥ ६९ ॥ वर्णा
श्रमास्तथाधर्मावर्णधर्मास्तथैवच ॥ यक्ष-
राक्षसगंधर्वादिक्पालादिग्गजादयः ॥ ७०
॥ सनकादिमुनिश्रेष्ठास्त्वमेवरघुपुंगव ॥ वस
वोष्टौत्रयः कालारुद्राएकादशास्मृताः ॥ ७१ ॥
तारकादशदिक्चैवत्वमेवरघुनंदन ॥ सप्त-
द्वीपाः समुद्राश्चनगानद्यस्तथाद्रुमाः ॥ ७२ ॥
स्थावराजंगमाश्चैवत्वमेवरघुनायक ॥ देवति
र्यङ्मनुष्याणांदानवानांतथैवच ॥ ७३ ॥ मा
तापितातथाभ्रातात्वमेवरघुवल्लभ ॥ सर्वे-
षांत्वंपरंब्रह्मत्वन्मयंसर्वमेवहि ॥ ७४ ॥ त्वम
क्षरंपरंज्योतिस्त्वमेवपुरुषोत्तम ॥ त्वमेवता

रकंब्रह्मत्वत्तोन्यन्नैवकिंचन ॥ ७५ ॥ शांतंसर्व
गतंसूक्ष्मंपरब्रह्मसनातनम् ॥ राजीवलोचनं
रामंप्रणमामिजगत्पतिम् ॥ ७६ ॥ ॥ व्यास
उवाच ॥ ॥ ततः प्रसन्नः श्रीरामोप्रोवाचमु-
निपुंगवं ॥ तुष्टोस्मिमुनिशार्दूलवृणीष्ववर
मुत्तमं ॥ ७७ ॥ ॥ नारदउवाच ॥ ॥ यदितु
ष्टोसिसर्वज्ञश्रीरामकरुणानिधे ॥ त्वन्मूर्त्तिद
र्शनेनैवकृतार्थोहंचसर्वदा ॥ ७८ ॥ धन्योहं
कृतकृत्योऽहंपुण्योहंपुरुषोत्तम ॥ अद्यमेस
फलंजन्मजीवितंसफलंचमे ॥ ७९ ॥ अद्यमेस
फलंज्ञानमद्यमेसफलंतपः ॥ अद्यमेसफलंक
र्मत्वत्पादांभोजदर्शनात् ॥ अद्यमेसफलंसर्वं
त्वन्नामस्मरणंतथा ॥ ८० ॥ त्वत्पादांभोरु
हद्वंद्वसद्भक्तिंदेहिराघव ॥ ततः परमसंप्रीतो
सरामः प्राहनारदं ॥ ८१ ॥ ॥ श्रीरामउवाच

॥ ॥मुनिवर्यमहाभागमुनेलिष्टंददामिते ॥य
त्वयाचेप्सितंसर्वमनसातद्भविष्यति ॥८२॥
॥नारदउवाच॥ ॥वरंनयाचेरघुनाथयुष्मत्
पादाब्जभक्तिःसततंममास्तु ॥ इदंप्रियंनाथ
वरंप्रयाचेपुनःपुनस्त्वामिदमेवयाचे ॥८३॥
॥व्यासउवाच॥ ॥इत्येवमीडितोरामोप्रादा
त्तस्मैवरांतरम् ॥ विरराममहातेजाःसच्चिदा
नंदविग्रहः ॥८४॥ अद्वैतममलंज्ञानंस्वना
मस्मरणंतथा ॥ अंतर्धायजगन्नाथःपुरत-
स्तस्यराघवः ॥८५॥ इतिश्रीरघुनाथस्यस्त
वराजमनुत्तमम् ॥सर्वसौभाग्यसंपत्तिदायकं-
मुक्तिदंशुभम् ॥८६॥ कथितंब्रह्मपुत्रेणवेदा
नांसारमुत्तमम् ॥गुह्याद्गुह्यतमंदिव्यंतवस्नेहा
त्प्रकीर्तितं ॥८७॥ यःपठेच्छृणुयाद्वापित्रिसं-
ध्यंश्रद्धयान्वितः ॥ब्रह्महत्यादिपापानितत्समा

निबह्वूनिच ॥ ८८ ॥ स्वर्णस्तेयीसुरापानी गुरुत
ल्पायुतानिच ॥ गोवधाद्युपपापानि अनृनात्सं
भवानिच ॥ सर्वैः प्रमुच्यते पापैः कल्पायुतश-
तोद्भवैः ॥ मानसंवाचिकंपापंकर्मणासमुपार्जि
तम् ॥ ९० ॥ श्रीरामस्मरणेनैवतत्क्षणान्नश्य
तिध्रुवम् ॥ इदंसत्यमिदंसत्यंसत्यमेतदिहोच्य
ते ॥ ९१ ॥ रामंसत्यंपरंब्रह्म रामात्किंचिन्नवि
द्यते ॥ तस्माद्रामस्यरूपोयंसत्यंसत्यमिदंज
गत् ॥ ९२ ॥ श्रीरामचंद्ररघुपुंगवराजवर्यरा
जेंद्ररामरघुनायकराघवेश ॥ राजाधिराजरघु
नंदनरामचंद्रदासोहमद्यभवतः शरणागतो
स्मि ॥ ९३ ॥ वैदेहीसहितंसुरद्रुमतलेहैमेमहा
मंडपेमध्येपुष्पकमासनेमणिमये वीरासनेसं
स्थितम् ॥ अग्रेवाचयति प्रभंजनसुतं तत्त्वंमु
नींद्रैः परंव्याख्यानंभरतादिभिः परिवृतंरामं-

भजेश्यामलम् ॥ ९४ ॥ रामं रत्नकिरीटकुंडल
युतं केयूरहारान्वितं सीतालंकृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादिहरीश्वरैः
सुरगणैः संसेव्यमानं सदा विश्वामित्रपराशरा
दिमुनिभिः संस्तूयमानं प्रभुम् ॥ ९५ ॥ सक
लगुणनिधानं योगिभिः स्तूयमानं भुजविजि
तसमानं राक्षसेंद्रादिमानम् ॥ महितनृपभया
नं सीतया शोभमानं स्मृतहृदयविमानं ब्रह्मरा
माभिधानम् ॥ ९६ ॥ रघुवर तव मूर्तिर्मामके
मानसाब्जे नरकगतिहरं ते नामधेयं मुखे मे
॥ अनिशमतुलभक्त्या मस्तकं त्वत्पदाब्जं भ
वजलनिधिमग्नं रक्षमामार्तबंधो ॥ ९७ ॥ रा
मरत्नमहं वंदे चित्रकूटपतिं हरिम् ॥ कौसल्या
भक्तिसंभूतं जानकीकंठभूषणम् ॥ ९८ ॥ ॥
इतिश्रीसनत्कुमारसंहितायां नारदोक्तं श्रीरा

मचंद्रस्तवराजस्तोत्रंसंपूर्णम् ॥ ॥७॥
इतिरामचंद्रस्तवराजःसमासः

---

अथब्रह्मकृतरामस्तुतिप्रारंभः
श्रीपरमात्मनेनमः॥ ॥ब्रह्मोवाच॥ ॥वंदे
देवंविष्णुमशेषस्थितिहेतुंत्वामध्यात्मज्ञानि
भिरंतर्हृदिभाव्यं ॥ हेयाहेयद्वंद्वविहीनंपरमे
कंसत्तामात्रंसर्वहृदिस्थंदृशिरूपं ॥१॥ प्राणा
पानौनिश्चयबुद्ध्याहृदिरुद्ध्वाछित्त्वासर्वसंश
यबंधंविषयौघान् ॥ पश्यंतीशंयंगतमोहायं
तयस्तंवंदेरामंरत्नकिरीटंरविभासं ॥ २ ॥मा
यातीतंमाधवमाद्यंजगदादिंमानातीतंमोहः
विनाशंमुनिवंद्यं ॥ योगिध्येयंयोगविधानंप
रिपूर्णंवंदेरामंरंजितलोकंरमणीयं ॥३॥भा
वाभावप्रत्ययहीनंभवमुख्यैर्योगासक्तैरर्चि

तपादांबुजयुग्मं ॥ नित्यंशुद्धंबुद्धमनंतंप्रण-
वाख्यंवंदेराममंवीरमशेषासुरदावं ॥४॥ त्वंमे
नाथोनाथितकार्याखिलकारीमानातीतोमा
धवरूपोखिलधारी ॥ भक्त्यागम्योभावित
रूपोभवहारीयोगाभ्यासैर्भावितचेतःसहचा
री ॥५॥ त्वामाद्यंतंलोकततीनांपरमीशंलोका
तीतंलौकिकमानैरधिगम्यं ॥ भक्तिश्रद्धाभाव
समेतैर्भजनीयंवंदेराममंसुंदरमिंदीवरनीलं ॥
६ ॥ कोवाज्ञातुंत्वामतिमानंगतमानंमानास
क्तोमाधवशक्तोमुनिमान्यं ॥ वृंदारण्येवंदित
वृंदारकवृंदंवंदेराममंभवमुखवंद्यंसुखकंदं ॥
७ ॥ नानाशास्त्रैर्वेदकदंबैःप्रतिपाद्यंनित्या
नंदंनिर्विषयज्ञानमनादिं ॥ मत्सेवार्थंमानु
षभावंप्रतिपन्नंवंदेराममंमरकतवर्णमधुरेशं
॥८ ॥ श्रद्धायुक्तोयःपठतीमंस्तवमाद्यंब्राह्मं

ब्रह्मज्ञानविधानमेकविमर्शः ॥ रामंश्यामंकां
क्षितकामप्रदर्मीशंध्यात्वाध्यानात्पातकजालै
र्निगतःस्यात् ॥९॥ ॥इतिश्रीमदध्यात्मरा
मायणेयुद्धकांडेब्रह्मदेवकृतरामस्तुतिःसमा
प्ता ॥ ॥छ॥ ॥छ॥ ॥छ

---

## अथरामगीताप्रारंभः

श्रीगणेशायनमः॥ ॥महादेवउवाच ॥ ॥
ततोजगन्मंगलमंगलात्मना विधायरामायण
कीर्तिमुत्तमाम् ॥चचारपूर्वाचरितंरघूत्तमो-
राजर्षिवर्यैरभिसेवितंयथा ॥१॥ सौमित्रि
णापृष्टउदारबुद्धिनारामःकथाःप्राहपुरात
नीःशुभाः ॥राज्ञःप्रमत्तस्यनृगस्यशापतो
द्विजस्यतिर्यक्त्वमथाहराघवः ॥२॥ क
दाचिदेकांतउपस्थितंप्रभुंरामंरमालालित

पादपंकजम् ॥ सौमित्रिरासादितशुद्धभावतः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥ ३ ॥ ॥ सौमित्रिरुवाच ॥ ॥ त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिः स्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृंगाहितसंगसंगिनाम् ॥ ४ ॥ अहं प्रपन्नोऽस्मि पदांबुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथांऽजसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥ श्रुत्वाऽथ सौमित्रिवचोऽखिलं तदा प्राह प्रपन्नार्तिहरः प्रसन्नधीः ॥ विज्ञानमज्ञानतमोपशांतये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥ ॥ श्रीराम उवाच ॥ ॥ आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः ॥ समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मल

ध्यये ॥ ७ ॥ क्रियाशरीरोद्भवहेतुराहताप्रि-
याप्रियौतौ भवतः स्वरागिणः ॥ धर्मेतरौतत्र
पुनः शारीरकंपुनः क्रियाचक्रवदीर्यतेभवः॥
८ ॥ अज्ञानमेवास्यहि मूलकारणं तद्धानमे
वात्रविधौविधीयते ॥ विद्यैवतन्नाशविधौप
टीयसीनकर्मतज्जंसविरोधमीरितं ॥ ९ ॥ ना
ज्ञानहानिर्नचरागसंक्षयोभवेत्ततः कर्मसदो
षमुद्भवेत् ॥ ततःपुनः संसृतिरप्यवारिता-
तस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥ न-
नुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषा
र्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदि
ताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥ कर्म
कृतोदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमि
दंमुमुक्षुणा ॥ ननुस्वतंत्राध्रुवकार्यकारि-
णीविद्यानकिंचिन्मनसाप्यपेक्षते ॥ १२ ॥

नसत्यकार्योपिहियद्वदध्वरः प्रकांक्षतेऽ-
न्यानपिकारकादिकान् ॥ तथैवविद्याविधितः प्रकाशितैर्विशिष्यतेकर्मभिरेवमुक्तये ॥१३॥ केचिद्वदंतीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥ देहाभिमानादभिवर्धतेक्रिया विद्यागताहंकृतितः प्रसिध्यति ॥१४॥ विशुद्धविज्ञानविरोचनांचिता विद्यात्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहंतिविद्याऽखिलकारकादिकम् ॥१५॥ तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ॥ आत्मानुसंधानपरायणः सदानिवृत्तसर्वेंद्रियवृत्तिगोचरः ॥१६॥ यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयो विधिवादकर्मणाम् ॥ नेतीतिवाक्यैरखिलंनिषिध्यतज्ज्ञा

त्वापरात्मानमथत्यजेत्क्रियाः ॥ १७ ॥ यदा
परात्मात्मविभेदभेदकं विज्ञानमात्मन्यव-
भातिभास्वरम् ॥ तदैवमायाप्रविलीयतें-
जसासकारकाकारणमात्मसंसृतेः ॥ १८ ॥
श्रुतिप्रमाणाभिविनाशिताचसा कथंभवि
ष्यत्यपिकार्यकारिणी ॥ विज्ञानमात्रादम-
लाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति
॥ १९ ॥ यदिस्मनष्टानपुनःप्रसूयतेकर्त्ताह
मस्येतिमतिःकथंभवेत् ॥ तस्मात्स्वतंत्रा
नकिमप्यपेक्षतेविद्याविमोक्षायविभाति-
केवला ॥ २० ॥ सातैत्तिरीयश्रुतिराहसाद
रंन्यासंप्रशस्ताखिलकर्मणांस्फुटम् ॥ ए-
तावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षाय
नकर्मसाधनम् ॥ २१ ॥ विद्यासमत्वेनतुद-
र्शितस्त्वयाक्रतुर्नदृष्टांतउदाहृतःसमः ॥ फ

लैः पृथक्त्वाद्बहुकारकैः क्रतुः संसाध्यतेऽज्ञानमतो विपर्ययम् ॥ २२ ॥ समस्तवाद्योऽस्यह मित्यनात्मधीरज्ञप्रसिद्धान्ततु तत्त्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतः कर्मविधिप्रकाशितं ॥ २३ ॥ श्रद्धान्वितस्तत्त्वमसीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः ॥ विज्ञाय चैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकंपनः ॥ २४ ॥ आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥ तत्त्वंपदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत् ॥ २५ ॥ प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मनाम् ॥ संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥ २६ ॥ एकात्मकत्वाज्जहतीन संभवेत्तथाज

हल्लक्षणताविरोधतः ॥ सोयंपदार्थाविव
भागलक्षणायुज्येततत्त्वंपदयोरदोषतः ॥
२७ ॥ रसादिपंचीकृतभूतसंभवंभोगालयं
दुःखसुखादिकर्मणां ॥ शरीरमाद्यंतवदा
दिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥
२८ ॥ सूक्ष्मंमनोबुद्धिदशेंद्रियैर्युतंप्राणैरपं
चीकृतभूतसंभवम् ॥ भोक्तुःसुखादेरनुसा
धनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९
अनाद्यनिर्वाच्यमपीहकारणंमायाप्रधानंतुप-
रंशरीरकं ॥ उपाधिभेदात्तुयतःपृथक्स्थितं
स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥
कोशेषुपंचस्वपितत्तदाकृतिर्विभातिसंगात्स्फ
टिकोपलोयथा ॥ असंगरूपोऽयमजोयतोऽ
द्वयोविज्ञायतेस्मिन्परितोविचारिते ॥ ३१ ॥ बु
द्धेस्त्रिधावृत्तिरपीहदृश्यतेस्वप्नादिभेदेनगु-

पात्रयात्मनः ॥ अन्योन्यतोस्मिन्व्यभिचार-
तोमृषा नित्येपरेब्रह्मणिकेवलेशिवे ॥ ३२ ॥
देहेंद्रियप्राणमनश्चिदात्मनांसंघादजस्रंप-
रिवर्त्ततेधियः ॥ वृत्तिस्तमोमूलतयाऽज्ञलक्ष
णायावद्भवेत्तावदसौभवोद्भवः ॥ ३३ ॥ नेति
प्रमाणेननिराकृताखिलोहृदासमास्वादित
चिद्घनामृतः ॥ त्यजेदशेषंजगदात्तसद्रसंपी
त्वायथांऽभःप्रजहातितत्फलं ॥ ३४ ॥ कदा
चिदात्मानमृतोनजायतेनक्षीयतेनापिविव
र्द्धतेनवः ॥ निरस्तसर्वातिशयःसुखात्मकः
स्वयंप्रभःसर्वगतोऽयमद्वयः ॥ ३५ ॥ एवंवि
धेज्ञानमयेसुखात्मकेकथंभवोदुःखमयः
प्रतीयते ॥ अज्ञानतोऽध्यासवशात्प्रकाश
तेज्ञानेविलीयेतविरोधतःक्षणात् ॥ ३६ ॥
यदन्यदन्यत्रविभाव्यतेभ्रमादध्यासमित्या

हुरसुंविपश्चितः ॥ असर्पभूतेहिविभावनं यथारज्वादिकेतद्वदपीश्वरेंजगत् ॥ ३७ ॥ विकल्पमायारहितेचिदात्मकेऽहंकारएष प्रथमः प्रकल्पितः ॥ अध्यासएवात्मनिसर्व कारणेनिरामयेब्रह्मणिकेवलेपरे ॥ ३८ ॥ इच्छादिरागादिसुखादिधर्मिकाः सदाधियःसंसृतिहेतवःपरे ॥ यस्मात्प्रसुप्तौतदभावतः परः सुखस्वरूपेणविभाव्यतेहिनः ॥ ३९ ॥ अनाद्यविद्योद्भवबुद्धिबिंबितो जीवःप्रकाशोऽयमितीर्यतेचितः ॥ आत्माधियःसाक्षितयापृथक्स्थितो बुद्ध्यापरिच्छिन्नपरःसएवहि ॥ ४० ॥ चिद्बिंबसाक्षात्मधियांप्रसंगतस्त्वेकत्रवासादनलाक्तलोहवत् ॥ अन्योऽन्यमध्यासवशात्प्रतीयते जडाऽजडत्वंचचिदात्मचेतसोः ॥ ४१ ॥ गु-

रोः सकाशादपि वेद वाक्यतः संजात विद्या-
नुभवो निरीक्ष्यतं ॥ स्वात्मानमात्मस्थमुपा-
धिवर्जितं त्यजेदशेषं जडमात्मगोचरं ॥ ४२
॥ प्रकाशरूपोऽहमजोऽहम द्वयो सकृद्विभातो
हमतीवनिर्मलः ॥ विशुद्ध विज्ञान घनो निरा
मयः संपूर्ण आनंदमयोहमक्रियः ॥ ४३ ॥
सदैवमुक्तोऽहमचिंत्यशक्तिमानतींद्रियज्ञा-
नमविक्रियात्मकः ॥ अनंतपारोहमहर्निशं
बुधैर्विभावितोऽहं हृदि वेदवादिभिः ॥ ४४
॥ एवं सदात्मानमखंडितात्मना विचारमाण
स्य विशुद्ध भावना ॥ हन्यादविद्यामचिरेण-
कारकै रसायनं यद्वदुपासितं रुजः ॥ ४५ ॥
विविक्त आसीन उपारतेंद्रियो विनिर्जितात्मा
विमलांतराशयः ॥ विभावयेदेकमनन्यसा
धनो विज्ञानदृक्केवल आत्मसंस्थितः ॥ ४६

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्म-
निसर्वकारणं ॥ पूर्णश्चिदानंदमयोवतिष्ठ-
तेनवेदबाह्यंनचकिंचिदांतरं ॥ ४७ ॥ पूर्वंस
माधेरखिलंविचिंतयेदोंकारमात्रंसचराच-
रंजगत् ॥ तदेववाच्यंप्रणवोहिवाचकोवि-
भाव्यतेज्ञानवशान्नबोधतः ॥ ४८ ॥ अ-
कारसंज्ञः पुरुषोहिविश्वकोह्युकारकस्तैजस
ईर्यतेक्रमात् ॥ प्राज्ञोमकारः परिपठ्यतेखि
लैः समाधिपूर्वंनतुतत्त्वतोभवेत् ॥ ४९ ॥ वि
श्वंत्वकारंपुरुषंविलापयेदुकारमध्येबहुधा-
व्यवस्थितं ॥ ततोमकारेप्रविलाप्यतैजसंद्वि
तीयवर्णंप्रणवस्यचांतिमं ॥ ५० ॥ मकारम-
प्यात्मनिचिद्घनेपरेविलापयेत्प्राज्ञमपीहका
रणं ॥ सोऽहंपरंब्रह्मसदाविमुक्तिमद्विज्ञान
दृङ्मुक्तउपाधितोऽमलः ॥ ५१ ॥ एवंसदा-

ज्ञानपरात्मभावन: स्वानंदतुष्ट: परिविस्मृ-
ताखिल: ॥ आस्तेसनित्यात्मसुखप्रकाश
क: साक्षाद्विमुक्तो ऽचलवारिसिंधुवत् ॥ ५२
॥ एवंसदाभ्यस्तसमाधियोगिनो निवृत्तसर्वे
द्रियगोचरस्यहि ॥ विनिर्जिताशेषरिपोरहं
सदा दृश्योभवेयंजितषड्गुणात्मन: ॥ ५३ ॥
ध्यात्वैवमात्मानमहर्निशंमुनिस्तिष्ठेत्सदा मुक्त
समस्तबंधन: ॥ प्रारब्धमश्नन्नभिमानवर्जि
तोमय्येवसाक्षात्प्रविलीयतेतत: ॥ ५४ ॥ आ
दौचमध्येचतथैवचांततोभवंविदित्वाभय-
शोककारणं ॥ हित्वासमस्तंविधिवादचोदितं
भजेत्स्वमात्मानमथाखिलात्मनां ॥ ५५ ॥
आत्मन्यभेदेनविभावयन्निदंभवत्यभेदेन
मयात्मनातदा ॥ यथाजलंवारिनिधौयथा
पय: क्षीरेवियद्व्योम्न्यनिलेयथानिल: ॥

५६ ॥ इत्थंयदीक्षेतहिलोकसंस्थितोजग-
न्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रु
तियुक्तिमानतोयथेंदुभेदोदिशिदिग्भ्रमा
दयः ॥ ५७ ॥ यावन्नपश्येदखिलंमदात्मकं
तावन्मदाराधनतत्परोभवेत् ॥ श्रद्धालुरत्यू
र्जितभक्तिलक्षणोयस्तस्यदृश्योहमहर्निशं
हृदि ॥ ५८ ॥ रहस्यमेतच्छ्रुतिसारसंग्रहंम
याविनिश्चित्यतवोदितंप्रिय ॥ यस्त्वेतदालो
चयतीहबुद्धिमान्समुच्यतेपातकराशिभिः
क्षणात् ॥ ५९ ॥ भ्रातर्यदीदंपरिदृश्यतेज
गन्मायैवसर्वंपरिहृत्यचेतसा ॥ मद्भावना-
भावितशुद्धमानसः सुखीभवानंदमयो-
निरामयः ॥ ६० ॥ यःसेवतेमामगुणंगुणा
त्परंहृदाकदावायदिवागुणात्मकं ॥ सो॰
हंस्वपादांचितरेणुभिःस्पृशन्पुनातिलो-

कश्चित्तयंयथारविः ॥६१॥ विज्ञानमेतदखिलंश्रुतिसारमेकंवेदांतवेद्यचरणेनमयैवगीतम् ॥ यःश्रद्धयापरिपठेद्गुरुभक्तियुक्तोमद्रूपमेतियदिमद्वचनेषुभक्तिः ॥६२॥ ॥इतिश्रीमदध्यात्मरामायणेश्रीउमामहेश्वरसंवादेउत्तरकांडेरामगीतासमाप्ता ॥ ॥७॥ ॥

---

## अथसंक्षिप्तरामायणमूलमा०

श्रीगणेशायनमः ॥ ॥तपःस्वाध्यायनिरतंतपस्वीवाग्विदांवरं ॥ नारदंपरिपप्रच्छवाल्मीकिर्मुनिपुंगवं ॥१॥ कोन्वस्मिन्सांप्रतंलोकेगुणवान्कश्चवीर्यवान् ॥ धर्मज्ञश्चकृतज्ञश्चसत्यवाक्योदृढव्रतः ॥२॥ चारित्रेणचकोयुक्तःसर्वभूतेषुकोहितः ॥ विद्वान्कःकसमर्थश्चकश्चैकःप्रियदर्शनः ॥३॥ आत्मवान्कोजित-

क्रोधोद्युतिमान्कोनसूयकः ॥ कस्यबिभ्य
तिदेवाश्चजातरोषस्यसंयुगे ॥ ४ ॥ एतदि
च्छाम्यहंश्रोतुंपरंकौतूहलंहिमे ॥ महर्षेत्वं
समर्थोऽसिज्ञातुमेवंविधंनरं ॥ ५ ॥ श्रुत्वा
चैतत्त्रिलोकज्ञोवाल्मीकेर्नारदोवचः ॥ श्रू-
यतामितिचामंत्र्यप्रहृष्टोवाक्यमब्रवीत् ॥
६ ॥ बहवोदुर्लभाश्चैवयेत्वयाकीर्तितागुणाः
॥ मुनेवक्ष्याम्यहंबुद्ध्वातैर्युक्तःश्रूयतांनरः ॥
७ ॥ इक्ष्वाकुवंशप्रभवोरामोनामजनैःश्रुतः
॥ नियतात्मामहावीर्योद्युतिमान्धृतिमान्व-
शी ॥ ८ ॥ बुद्धिमान्नीतिमान्वाग्मीश्रीमाञ्छ
त्रुनिबर्हणः ॥ विपुलांसोमहाबाहुःकंबुग्री
वोमहाहनुः ॥ ९ ॥ महोरस्कोमहेष्वासोगूढ
जत्रुररिंदमः ॥ आजानुबाहुःसुशिराःसुल
लाटःसुविक्रमः ॥ १० ॥ समःसमविभक्तां

गः स्निग्धवर्णःप्रतापवान् ॥ पीनवक्षा विशा
लाक्षोलक्ष्मीवाञ्छुभलक्षणः ॥ ११ ॥ धर्मज्ञः
सत्यसंधश्चप्रजानांचहितेरतः ॥ यशस्वीज्ञा
नसंपन्नःशुचिर्वश्यःसमाधिमान् ॥ १२ ॥ प्र-
जापतिसमःश्रीमान्धातारिपुनिषूदनः ॥ रक्षि
ताजीवलोकस्यधर्मस्यपरिरक्षिता ॥ १३ ॥ रक्षि
तास्वस्यधर्मस्यस्वजनस्यचरक्षिता ॥ वेदवेदां
गतत्वज्ञोधनुर्वेदेचनिष्ठितः ॥ १४ ॥ सर्वशा-
स्त्रार्थतत्वज्ञःस्मृतिमान्प्रतिभानवान् ॥ स
र्वलोकप्रियःसाधुरदीनात्माविचक्षणः ॥ १५
॥ सर्वदाभिगतःसद्भिःसमुद्रइवसिंधुभिः ॥
आर्यःसर्वसमश्चैवसदैवप्रियदर्शनः ॥ १६
सचसर्वगुणोपेतःकौसल्यानंदवर्धनः ॥ स
मुद्रइवगांभिर्येधैर्येणहिमवानिव ॥ १७ ॥
विष्णुनासदृशोवीर्येसोमवत्प्रियदर्शनः ॥ का

लाग्निसदृशः क्रोधेक्षमयापृथिवीसमः ॥ १८
॥ धनदेनसमस्त्यागेसत्येधर्मइवापरः ॥ नमे
वंगुणसंपन्नंरामंसत्यपराक्रमं ॥ १९ ॥ ज्येष्ठं
श्रेष्ठगुणैर्युक्तंप्रियंदशरथात्मजं ॥ प्रकृती
नांहितैर्युक्तंप्रकृतिप्रियकाम्यया ॥ २० ॥-
यौवराज्येनसंयोक्तुमैच्छत्प्रीत्यामहीपतिः॥
तस्याभिषेकसंभारान्दृष्ट्वाभार्याथकैकयी
॥ २१ ॥ पूर्वंदत्तवरादेवीवरमेनमयाचत ॥-
विवासनंचरामस्यभरतस्याभिषेचनं ॥-
२२ ॥ ससत्यवचनाद्राजाधर्मपाशेनसंयु
तः ॥ विवासयामासमुतंरामंदशरथःप्रि
यं ॥ २३ ॥ सजगामवनंवीरःप्रतिज्ञामनु-
पालयन् ॥ पितुर्वचननिर्देशात्कैकेय्याः
प्रियकारणात् ॥ २४ ॥ तंव्रजंतंप्रियोभ्रा
तालक्ष्मणोनुजगामह ॥ स्नेहाद्विनयसंप

नः सुमित्रानंदवर्द्धनः ॥२५॥ भ्रातरंदयि
तोभ्रातुः सौभ्रात्रमनुदर्शयन् ॥ रामस्यद
यितोभ्रातुः सुमित्रानंदवर्धनः ॥ २६ ॥ज
नकस्यकुलेजातादेवमायेवनिर्मिता ॥ सर्व
लक्षणसंपन्नानारीणामुत्तमावधूः ॥ २७
सीताप्यनुगतारामंशशिनंरोहिणीयथा ॥
पौरैरनुगतोदूरंपित्रादशरथेनच ॥२८॥
शृंगवेरपुरेसूतंगंगाकूलेव्यसर्ज्जयत् ॥
गुहमासाद्यधर्मात्मानिषादाधिपतिंप्रियम्
॥ २९ ॥ गुहेनसहितोरामोलक्ष्मणेनचसी
तया ॥ तेवनेनवनंगत्वानदीस्तीर्त्वाबहूद
काः ॥३०॥ चित्रकूटमनुप्राप्यभरद्वाज-
स्यशासनात् ॥ रम्यमावसथंकृत्वारममा
णावनेत्रयः ॥३१॥ देवगंधर्वसंकाशास्त-
त्रतेन्यवसन्सुखम् ॥ चित्रकूटंगतेरामेपु

त्रशोकातुरस्तदा ॥ ३२ ॥ राजादशरथः
स्वर्गंजगामविलपन्सुतम् ॥ मृतेतुतस्मि
न्भरतोवसिष्ठप्रमुखैर्द्विजैः ॥ ३३ ॥ नियु
ज्यमानोराज्यायनैच्छद्राज्यंमहाबलः ॥
सजगामवनंवीरोरामपादप्रसादकः ॥ ३४
गत्वातुसमहात्मानंरामंसत्यपराक्रमम् ॥
अयाचद्भ्रातरंराममार्यभावपुरस्कृतः ॥
३५ ॥ त्वमेवराजाधर्मज्ञइतिरामंवचोऽब्र-
वीत् ॥ रामोपिपरमोदारःसमुखःसुम-
हायशाः ॥ ३६ ॥ नचैच्छत्पितुरादेशाद्रा-
ज्यंरामोमहाबलः ॥ पादुकेचास्यराज्या-
यन्यासंदत्वापुनःपुनः ॥ ३७ ॥ निवर्तया
मासततोभरतंभरताग्रजः ॥ सतुकाममन
वाप्यैवरामपादावुपस्पृशन् ॥ ३८ ॥ नंदि
ग्रामेकरोद्राज्यंरामागमनकांक्षया ॥ गते

तुभरतेश्रीमान्सत्यसंधोजितेंद्रियः ॥३९॥-
रामस्तुपुनरालक्ष्यनागरस्यजनस्यच ॥त-
त्रागमनमेकाग्रोदंडकान्प्रविवेशह ॥४०॥प्र
विश्यतुमहारण्यंरामोराजीवलोचनः ॥ विराधं
राक्षसंहत्वाशरभंगंददर्शह ॥४१॥सुतीक्ष्णंचा
प्यगस्त्यंच अगस्त्यभ्रातरंतथा ॥ अगस्त्यव
चनाच्चैवजग्राहैंद्रंशरासनम् ॥४२॥ खड्गंच
परमप्रीतस्तूणीचाक्षय्यसायकौ ॥ वसतस्त
स्यरामस्यवनेवनचरैःसह ॥४३॥ ऋषयो-
भ्यागमन्सर्वेवधायासुरराक्षसां ॥ सतेषां-
प्रतिशुश्रावराक्षसानांतथावने ॥४४॥ प्र-
तिज्ञातश्चरामेणवधःसंयतिरक्षसां ॥ ऋ
षीणामग्निकल्पानांदंडकारण्यवासिनां ॥
४५॥ तेनतत्रैववसताजनस्थाननिवासि-
नी ॥ विरूपिताशूर्पणखाराक्षसीकामरू-

पिणी ॥ ४६ ॥ ततः शूर्पणखावाक्यादुद्यु
क्तान्सर्वराक्षसान् ॥ खरंत्रिशिरसंचैवदूष
णंचैवराक्षसं ॥ ४७ ॥ निजघानरणेराम-
स्तेषांचैवपदानुगान् ॥ वनेतस्मिन्निवसता
जनस्थाननिवासिनां ॥ ४८ ॥ रक्षसांनिह
तान्यासन्सहस्राणिचतुर्दश ॥ ततोज्ञाति-
वधंश्रुत्वारावणःक्रोधमूर्च्छितः ॥ ४९ ॥ स
हायंवरयामासमारीचंनामराक्षसं ॥ वार्य
माणःस्रबहुशोमारीचेनसरावणः ॥ ५० ॥
नविरोधोबलवताक्षमोरावणतेनते ॥ अ-
नादृत्यतुतद्वाक्यंरावणःकालचोदितः ॥-
५१ ॥ जगामसहमारीचस्तस्याश्रमपदंत-
दा ॥ तेनमायाविनादूरमपवाह्यनृपात्म-
जौ ॥ ५२ ॥ जहारभार्यांरामस्यगृध्रंहत्वा
जटायुषं ॥ गृध्रंचनिहतंदृष्ट्वाहृतांश्रुत्वाच

मैथिलीम् ॥ ५३ ॥ राघवः शोकसंतप्तो विल
लापाकुलेंद्रियः ॥ ततस्तेनैवशोकेनगृध्रंद-
ग्ध्वाजटायुषं ॥ ५४ ॥ मार्गमाणोवनेसीतां
राक्षसंसंददर्शह ॥ कबंधंनामरूपेण विकृ
तंघोरदर्शनं ॥ ५५ ॥ तंनिहत्यमहाबाहुर्द-
दाहस्वर्गतश्चसः ॥ सचास्य कथयामास श
बरींधर्मचारिणीं ॥ ५६ ॥ श्रमणींधर्मनिपु-
णामभिगच्छेतिराघवं ॥ सोभिगच्छन्महाते
जाः शबरींशत्रुसूदनः ॥ ५७ ॥ शबर्या पू-
जितः सम्यग्रामोदशरथात्मजः ॥ पंपातीरे
हनुमतासंगतोवानरेणह ॥ ५८ ॥ हनुमद्वच
नाच्चैवसुग्रीवेणसमागमः ॥ सुग्रीवायचत
त्सर्वंशंसद्रामोमहाबलः ॥ ५९ ॥ आदित-
स्तद्यथावृत्तंसीतायाश्चविशेषतः ॥ सुग्री
वश्चापितत्सर्वंश्रुत्वारामस्यवानरः ॥ ६० ॥

चकारसख्यंरामेणप्रीतश्चैवाग्निसाक्षिकं ॥
ततोवानरराजेनवैरानुकथनंप्रति ॥६१॥रा·
मायावेदितंसर्वंप्रणयाद्दुःखितेनच ॥ प्रति
ज्ञातंचरामेणतदावालिवधंप्रति ॥६२॥ वा
लिनश्चबलंतत्रकथयामासवानरः ॥ सुग्री·
वः शंकितश्चासीन्नित्यंवीर्येणराघवे ॥६३॥
राघवप्रत्ययार्थंतुदुंदुभेःकायमुत्तमं ॥ दर्श·
यामाससुग्रीवोमहापर्वतसन्निभं ॥६४॥उ
त्स्मयित्वामहाबाहुःप्रेक्ष्यचास्थिमहाबलः
॥ पादांगुष्ठेनचिक्षेपसंपूर्णंदशयोजनं ॥६५
॥बिभेदचपुनस्तालान्सप्तैकेनमहेषुणा ॥
गिरिंरसातलंचैवजनयन्प्रत्ययंतदा ॥६६॥
ततःप्रीतमनास्तेनविश्वस्तःसमहाकपिः ॥
किष्किंधांरामसहितोजगामचगुहांतदा ॥-
६७॥ ततोगर्जद्धरिवरःसुग्रीवोहेमपिंगलः॥

तेनंनादेनमहता निर्जगामहरीश्वरः ॥ ६८ ॥
अवमन्यंनदातारं सुग्रीवेणसमागतः ॥ नि-
जघानचतत्रैवंशरेणैकेनराघवः ॥ ६९ ॥ ततः
सुग्रीववचनाद्धत्वावालिनमाहवे ॥ सुग्रीवमे
वतद्राज्येराघवः प्रत्यपादयत् ॥ ७० ॥ सच-
सर्वान्समानीयवानरान्वानरर्षभः ॥ दिशः
प्रस्थापयामास दिदृक्षुर्जनकात्मजां ॥ ७१ ॥
ततोगृध्रस्यवचनात्संपातेर्हनुमान्बली ॥
शतयोजनविस्तीर्णंपुप्लुवेलवणार्णवं ॥ ७२ ॥
तत्रलंकांसमासाद्यपुरींरावणपालितां ॥ द
दर्शसीतांध्यायंतीमशोकवनिकागतां ॥ ७३
॥ निवेदयित्वाभिज्ञानंप्रवृत्तिंविनिवेद्यच ॥ स
माश्वास्यचवैदेहीमर्दयामासतोरणं ॥ ७४ ॥
पंचसेनाग्रगान्हत्वा ससमंत्रिसुतानपि ॥ शू
रमक्षंचनिष्पिष्यग्रहणंसमुपागमत् ॥ ७५ ॥

अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वापैतामहाद्बुरान् ॥ मर्षयन्राक्षसान्वीरोमंत्रिणस्तान्यदृच्छया ॥ ७६ ॥ ततोदग्ध्वापुरींलंकामृतेसीतांच मैथिलीं ॥ रामायप्रियमाख्यातुंपुनरायान्महाकपिः ॥ ७७ ॥ सोभिगम्यमहात्मानं कृत्वाराममप्रदक्षिणम् ॥ न्यवेदयदमेयात्मादृष्टासीतेतितत्त्वतः ॥ ७८ ॥ ततःसुग्रीवसहितोगत्वा-तीरंमहोदधेः ॥ समुद्रंक्षोभयामास शरैरादित्यसन्निभैः ॥ ७९ ॥ दर्शयामासचात्मानं समुद्रःसरितांपतिः ॥ समुद्रवचनाच्चैव नलः सेतुमकारयत् ॥ ८० ॥ तेनगत्वापुरींलंकांहत्वारावणमाहवे ॥ रामःसीतामनुप्राप्यपरांव्रीडामुपागमत् ॥ ८१ ॥ तामुवाचततोरामःपरुषंजनसंसदि ॥ अमृष्यमाणासासीता विवेशज्वलनंसती ॥ ८२ ॥ ततोग्निवचनात्सीतां

ज्ञात्वा विगतकल्मषां ॥ कर्मणानेनमहता त्रै
लोक्यंसचराचरं ॥८३॥ सदेवर्षिगणंतुष्टंरा
घवस्यमहात्मनः ॥ बभौरामः संहृष्टः पू
जितःसर्वदैवतैः ॥८४॥ अभिषिच्यचलंका
यांराक्षसेंद्रं विभीषणम् ॥ कृतकृत्यस्तदारा
मो विज्वरः प्रमुमोदह ॥८५॥ देवताभ्योवरं
प्राप्यसमुत्थाप्यचवानरान् ॥ अयोध्यांप्र
स्थितोरामः पुष्पकेणसुहृद्वृतः ॥८६॥ भ
रद्वाजाश्रमंगत्वा रामः सत्यपराक्रमः ॥ भ
रतस्यांतिकंरामोहनुमंतंव्यसर्जयत् ॥८७॥
पुनराख्यायिकांजल्पन्सुग्रीवसहितस्तदा
॥ पुष्पकंतत्समारुह्यनंदिग्रामंययौतदा ॥
८८ ॥ नंदिग्रामेजटांहित्वा भ्रातृभिःसहितो
नघः ॥ रामः सीतामनुप्राप्यराज्यंपुनरवाप्त
वान् ॥८९॥ प्रहृष्टमुदितोलोकस्तुष्टः पुष्टः

स्तु धार्मिकः ॥ निरामयोत्वरोगश्चदुर्भिक्ष-
भयवर्जितः ॥ ९० ॥ नपुत्रमरणंकेचिद्द्रक्ष्यं
ति पुरुषाः क्वचित् ॥ नार्यश्चाविधवानित्यंभ
विष्यंतिपतिव्रताः ॥ ९१ ॥ नचाग्निजंभयं-
किंचिन्नाप्सुमज्जंतिजंतवः ॥ नवातजंभयं
किंचिन्नापिज्वरकृतंतथा ॥ ९२ ॥ नचापिक्षु
द्भयंतत्र नतस्करभयंतथा ॥ नगराणिचरा-
ष्ट्राणि धनधान्ययुतानिच ॥ ९३ ॥ नित्यमसु
दिताः सर्वेयथाकृतयुगेतथा ॥ अश्वमेधश
तैरिष्ट्वा बहुवस्त्रसवर्णकैः ॥ ९४ ॥ गवांको-
टियुतंदत्वाब्रह्मलोकंगमिष्यति ॥ असंख्ये
यंधनंदत्वा ब्राह्मणेभ्योमहायशाः ॥ ९५ ॥
राजवंशाञ्छतगुणान्स्थापयिष्यतिराघवः
॥ चातुर्वर्ण्यंचलोकेस्मिन्स्वेस्वे धर्मेनियोक्ष्य
ति ॥ ९६ ॥ दशवर्षसहस्त्राणि दशवर्षशता

निव ॥ रामोराज्यमुपासित्वाब्रह्मलोकंगमि
ष्यति ॥९७॥ इदंपवित्रंपापघ्नंपुण्यंवेदैश्चसं
मितं ॥ यःपठेद्रामचरितंसर्वपापैःप्रमुच्यते
॥९८॥ एतदाख्यानमायुष्यंपठन्रामायणंन-
रः ॥ सपुत्रपौत्रःसगणः प्रेत्यस्वर्गेमहीयते॥
९९ ॥ पठन्द्विजोवागृषभत्वमीयात्स्यात्क्षत्रियोभूमिपतित्वमीयात् ॥ वणिक्जनःपण्यफ-
लत्वमीयाज्जनश्चशूद्रोपिमहत्वमीयात् ॥
१०० ॥ ॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकि-
ये आदिकाव्ये नारदवाक्ये संक्षिप्तः प्रथमः
सर्गः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

इतिसंक्षिप्तरामायणमूलंसमाप्तम्

## अथपांडवगीताप्रारंभः

श्रीगणेशायनमः ॥ ॥ पांडवउवाच ॥ ॥ प्र-

–ह्लादनारदपराशरपुंडरीकव्यासांबरीषशुक
शौनकभीष्मदाल्भ्यान् ॥ रुक्मांगदार्जुनव-
सिष्ठविभीषणादीन्पुण्यानिमान्परमभागव
तान्स्मरामि ॥१॥ ॥लोमहर्षणउवाच ॥ ॥
धर्मो विवर्द्धतियुधिष्ठिरकीर्तनेन पापंप्रणश्य
तिवृकोदरकीर्तनेन ॥ शत्रुर्विनश्यति धनंज
यकीर्तनेन माद्रीसुतौकथयतांनभवंतिरो
गाः ॥२॥ ॥ब्रह्मोवाच ॥ ॥येमानवाविग
तरागपरावरज्ञानारायणंसुरगुरुंसततंस्म-
रंति ॥ ध्यानेननेनहतकिल्बिषचेतनास्तेमा
तुःपयोधररसंनपुनःपिबंति ॥३॥ ॥इंद्रउ
वाच ॥ ॥नारायणोनामनरोनराणां प्रसि
द्धचोरःकथितःपृथिव्याम् ॥ अनेकजन्मा
र्जितपापसंचयंहरत्यशेषंस्मरतांसदैव ॥४
॥ ॥युधिष्ठिरउवाच ॥ ॥मेघश्यामंपीत-

कौशेयवासंश्रीवत्सांकंकौस्तुभोद्भासितांगं॥
पुण्योपेतंपुंडरीकायताक्षंविष्णुंवंदेसर्वलोकै
कनाथम् ॥५॥ ॥भीमसेनउवाच॥ ॥जयौ
घमग्नासचराचराधराविषाणकोट्याखिलवि
श्वमूर्तिना॥ समुद्धृतायेनवराहरूपिणासमे
स्वयंभूर्भगवान्प्रसीदताम् ॥६॥ ॥अर्जुन
उवाच॥ ॥अचिंत्यमव्यक्तमनंतमव्ययंवि
भुंप्रभुंभाविनविश्वभावनम्॥ त्रैलोक्यवि
स्तारविचारकारकंहरिंप्रपन्नोस्मिगतिंमहा-
त्मनाम् ॥७॥ ॥नकुलउवाच॥ ॥यदिग
मनमधस्तात्कालपाशानुबद्धोयदिचकुलवि
हीनेजायतेपक्षिकीटे॥ कृमिशतमपिगत्वा
जायतेचांतरात्मन्ममभवतुहृदिस्थेकेशवे-
भक्तिरेका ॥८॥ ॥सहदेवउवाच॥ ॥नस्य
यज्ञवराहस्यविष्णोरतुलतेजसः॥ प्रणामं

येप्रकुर्वंतितेषामपिनमोनमः ॥९॥ ॥कुंत्यु
वाच ॥ ॥स्वकर्मफलनिर्दिष्टांयांयांयोनिंव्र
जाम्यहम् ॥ तस्यांतस्यांहृषीकेशत्वयिभ-
क्तिर्दृढास्तुमे ॥१०॥ ॥माद्युवाच॥ ॥कृ
ष्णोरताःकृष्णमनुस्मरंतिरात्रौचकृष्णंपुन
रुत्थितायें ॥ तेभिन्नदेहाःप्रविशंतिकृष्णं
हविर्यथामंत्रहुतंहुताशे ॥११॥ ॥द्रुपदउ
वाच ॥ ॥कीटेषुपक्षिषुमृगेषुसरीसृपेषुर
क्षःपिशाचमनुजेष्वपियत्रयत्र ॥ज्ञानस्य
मेभवतुकेशवत्वत्प्रसादात्त्वय्येवभक्तिरच-
लाव्यभिचारिणीच ॥१२॥ ॥सुभद्रोवाच
॥ ॥एकोपिकृष्णस्यकृतःप्रणामोदशाश्व
मेधावभृथैर्नतुल्यः ॥ दशाश्वमेधीपुनरेति
जन्मकृष्णप्रणामीनपुनर्भवाय ॥१३॥ ॥
अभिमन्युरुवाच ॥ ॥गोविंदगोविंदहरे

मुरारे गोविंद गोविंद मुकुंद कृष्ण ॥ गोविंद गो-
विंद रथांगपाणे गोविंद गोविंद नमो नमस्ते ॥१४
॥ धृष्टद्युम्न उवाच ॥ ॥ श्रीराम नारायण वासु
देव गोविंद वैकुंठ मुकुंद कृष्ण ॥ श्रीकेशवानंत
नृसिंह विष्णो मांत्राहि संसार भुजंगदष्टम् ॥
१५ ॥ ॥ सात्यकिरुवाच ॥ ॥ अप्रमेय हरे वि
ष्णो कृष्ण दामोदराच्युत ॥ गोविंदानंत सर्वेश
वासुदेव नमोस्तुते ॥१६॥ ॥ उद्धव उवाच ॥
वासुदेवं परित्यज्य योन्यं देवमुपासते ॥ तृषि
तो जान्हवीतीरे कूपं खनति दुर्मतिः ॥१७॥ ॥
धौम्य उवाच ॥ ॥ अपांसमीपे शयनासनस्थे
दिवाच रात्रौ च यथाधिगच्छता ॥ यद्यास्ति
किंचित्सुकृतं कृतं मया जनार्दनस्तेन कृतेन तु
ष्यतु ॥१८॥ ॥ संजय उवाच ॥ ॥ आर्ताविषण्णाः
शिथिलाश्च भीता घोरेषु व्याघ्रादिषु

वर्त्तमानाः ॥ संकीर्त्यनारायणशब्दमात्रंवि
मुक्तदुःखाःसुखिनोभवंति ॥१९॥ ॥अक्रू
रउवाच ॥ ॥अहमस्मिनारायणदासदासदा
सस्यदासस्यचदासदासः ॥ अन्योभ्यईशोज
गतोनराणांतस्मादहंचान्यतरोस्मिलोके ॥
२०॥ ॥विदुरउवाच॥ ॥वासुदेवस्ययेभ
क्ताःशांतास्तद्गतमानसाः ॥ तेषांदासस्यदा
सोहंभवेजन्मनिजन्मनि ॥२१॥ ॥भीष्मउ
वाच॥ ॥विपरीतेषुकालेषुपरिक्षीणेषुबं-
धुषु ॥ त्राहिमांकृपयाकृष्णशरणागतवत्स
ल ॥२२॥ ॥द्रोणाचार्यउवाच ॥ ॥येयेहता
चक्रधरेणराजन्त्रैलोक्यनाथेनजनार्दनेन
॥ तेतेगताविष्णुपुरींप्रयाताः क्रोधोपिदेव
स्यवरेणतुल्यः ॥२३॥ ॥कृपाचार्यउवाच ॥
॥मज्जन्मनःफलमिदंमधुकैटभारेमत्प्रार्थ

नीयमदनुग्रहएषएव ॥ त्वद्भृत्यभृत्यपरिचा
रकभृत्य भृत्य भृत्यस्य भृत्यइतिमांस्मरलोक
नाथ ॥ २४ ॥ ॥अश्वत्थामोवाच॥ ॥गोविंद
केशवजनार्दनवासुदेव विश्वेशविश्वमधुसू
दनविश्वनाथ ॥ श्रीपद्मनाभपुरुषोत्तमपु
ष्कराक्षनारायणाच्युतनृसिंहनमोनमस्ते ॥
२५ ॥ ॥कर्णउवाच ॥ ॥नान्यंवदामिनशृ
णोमिनचिंतयामिनान्यंस्मरामिनभजामिन
चाश्रयामि ॥ भक्त्यात्वदीयचरणांबुजमाद
रेण श्रीश्रीनिवासपुरुषोत्तमदेहिदास्यम् ॥
॥२६॥ ॥धृतराष्ट्रउवाच॥ नमोनमःकारण
वामनायनारायणायामितविक्रमाय ॥ श्री
शार्ङ्गचक्राब्जगदाधरायनमोस्तुतस्मैपुरुषो
त्तमाय॥ २७॥ ॥गांधार्युवाच॥ ॥त्वमेवमा
ताचपितात्वमेवत्वमेव बंधुश्चसखात्वमेव ॥

त्वमेवविद्याद्रविणंत्वमेवत्वमेवसर्वंममदेवदेव
॥२८॥ ॥द्रौपद्युवाच॥ ॥यज्ञेशाच्युतगो-
विंदमाधवानंतकेशव ॥ कृष्णविष्णोहृषीके
शवासुदेवनमोस्तुते ॥२९॥ ॥जयद्रथउवा-
च॥ ॥नमःकृष्णायदेवाय ब्रह्मणेनंतमूर्तये
॥योगेश्वराययोगायत्वामहंशरणंगतः ॥३०
॥ ॥विकर्णउवाच॥ ॥कृष्णायवासुदेवाय
देवकीनंदनायच ॥ नंदगोपकुमारायगोविंदा
यनमोनमः ॥३१॥ ॥सोमदत्तउवाच॥ ॥न
मःपरमकल्याणनमस्तेविश्वभावन ॥ वासु
देवायशांतायदूनांपतयेनमः ॥३२॥ ॥वि
राटउवाच॥ ॥नमोब्रह्मण्यदेवायगोब्राह्मण
हितायच ॥ जगद्धितायकृष्णायगोविंदायन
मोनमः ॥३३॥ ॥शल्यउवाच॥ ॥अतसीपु
ष्पसंकाशंपीतवाससमच्युतं ॥ येनमःस्यं

त्तिगोविंदंनतेषांविद्यतेभयं ॥३४॥ ॥बल
भद्रउवाच ॥ ॥कृष्णकृष्णकृपालुस्त्वमगती-
नांगतिर्भव ॥ संसारार्णवमग्नानांप्रसीदपुरु-
षोत्तम ॥३५॥ ॥श्रीकृष्णउवाच ॥ ॥कृष्ण
कृष्णेतिकृष्णेतियोमांस्मरतिनित्यशः ॥ ज-
लंभित्वायथापद्मंनरकादुद्धराम्यहं ॥३६॥
सत्यंब्रवीमिमनुजाःस्वयमूर्ध्वबाहुर्योमांमु-
कुंदनरसिंहजनार्दनेति ॥ जीवोजपत्यनुदिनं
मरणेरणेवापाषाणकाष्ठसदृशायददाम्यभी
ष्टं ॥३७॥ ॥सूतउवाच ॥ ॥तत्रैवगंगाय
मुनाचवेणीगोदावरीसिंधुसरस्वतीच ॥ सर्वा-
णितीर्थानिवसंतितत्र यत्राच्युतोदारकथाप्र-
संगः ॥३८॥ ॥यमउवाच ॥ ॥नरकेपच्य-
मानस्तुयमेनपरिभाषितः ॥ किंत्वयानार्चितो
देवःकेशवःक्लेशनाशनः ॥३९॥ ॥नारदउवा

च ॥ ॥जन्मांतरसहस्त्रेणतपोध्यानसमाधि
भिः ॥ नराणांक्षीणपापानांकृष्णेभक्तिःप्रजा
यते ॥४०॥ ॥प्रल्हादउवाच॥ ॥नाथयोनि-
सहस्त्रेषुयेषुयेषुव्रजाम्यहम् ॥ तेषुतेष्वचला
भक्तिरच्युतास्तुसदात्वयि ॥ ४१॥ याप्रीतिर
विवेकानांविषयेष्वनपायिनी ॥ त्वामनुस्मर-
तःसामेहृदयान्मापसर्पतु ॥४२॥ ॥विश्वामि
त्रउवाच ॥ ॥ किंतस्यदानैःकिंतीर्थैःकिंतपो-
भिःकिमध्वरैः ॥ योनित्यंध्यायतेदेवंनराणां
मनसिस्थितं ॥४३॥ ॥जमदग्निरुवाच॥ ॥
नित्योत्सवःसदातेषांनित्याश्रीर्नित्यमंगलं ॥
येषांहृदिस्थोभगवान्मंगलायतनंहरिः ॥४४
॥भरद्वाजउवाच॥ ॥लाभस्तेषांजयस्तेषांकु
तस्तेषांपराजयः ॥ येषामिंदीवरश्यामोहृदय-
स्थोजनार्दनः ॥४५॥ ॥गौतमउवाच॥ ॥गो

कोटिदानंग्रहणेषुकाशीप्रयागगंगायुतकल्प
वासः॥ यज्ञायुतंमेरुसुवर्णदानंगोविंदनाम्ना
स्मरणेनतुल्यम्॥ ४६॥ ॥अत्रिरुवाच॥ ॥गो
विंदेतिसदास्नानंगोविंदेतिसदाजपः॥ गोविं
देतिसदाध्यानंसदागोविंदकीर्तनं॥ ४७॥ अ
क्षरंहिपरंब्रह्मगोविंदेत्यक्षरत्रयम्॥ तस्मादु
च्चरितंयेनब्रह्मभूयायकल्पते॥ ४८॥ ॥श्री
शुकउवाच॥ ॥अच्युतःकल्पवृक्षोसौ अनंतः
कामधेनवः॥ चिंतामणिश्चगोविंदोहरिनाम
विचिंतयेत्॥ ४९॥ ॥हरिरुवाच॥ ॥जयति
जयतिदेवोदेवकीनंदनोयं जयतिजयतिकृ-
ष्णोवृष्णिवंशप्रदीपः॥ जयतिजयतिमेघ-
श्यामलःकोमलांगो जयतिजयतिपृथ्वीभार
नाशोमुकुंदः॥ ५०॥ ॥पिप्पलायनउवाच॥
॥श्रीमन्नृसिंहविभवेगरुडध्वजायतापत्रयो

पशामनाय भवौषधाय ॥ कृष्णाय वृश्चिकजलाग्नि भुजंगरोग क्लेशव्यपाय हरये गुरवे नमस्ते ॥५१॥ ॥आविर्होत्र उवाच ॥ ॥कृष्ण त्वदीय पदपंकज पंजरांते अद्यैव मे विशतु मानसराजहंसः ॥ प्राणप्रयाणसमये कफवातपित्तैः कंठावरोधन विधौ स्मरणं कुतस्ते ॥५२॥ ॥विदुर उवाच ॥ ॥हरेर्नामैव नामैव नामैव मम जीवनं ॥ कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥५३॥ ॥वसिष्ठ उवाच ॥ ॥कृष्णेति मंगलं नाम यस्य वाचि प्रवर्त्तते ॥ भस्मीभवंति तस्याशु महापातक कोटयः ॥५४॥ ॥अरुंधत्युवाच ॥ ॥कृष्णाय वासुदेवाय हरये परमात्मने ॥ प्रणतक्लेशनाशाय गोविंदाय नमो नमः ॥५५॥ ॥कश्यप उवाच ॥ ॥कृष्णानुस्मरणादेव पापसंघातपंजरः ॥ शतधा भेदमाप्नोति गिरिर्व

ज्ञहंतोयथा ॥५६॥ ॥दुर्योधनउवाच॥ ॥जा
नामि धर्मंनचमेप्रवृत्तिर्जानामिपापंनचमेनि
वृत्तिः ॥ केनाऽपिदेवेनहृदिस्थितेनयथानियु
क्तोस्मितथाकरोमि ॥५७॥ यंत्रस्यगुणदोषा
यंक्षम्यतांमधुसूदन ॥अहंयंत्रंभवान्यंत्री
नमेदोषोनमेगुणः॥५८॥ भृगुरुवाच॥ ॥ना
मैवनवगोविंदकलौत्वत्तःशताधिकम्॥ ददा
त्युच्चारणान्मुक्तिर्विना अष्टांगयोगतः ॥५९॥
॥ लोमहर्षणउवाच॥ ॥नमामिनारायणपा
दपंकजंकरोमिनारायणपूजनंसदा ॥वदामि
नारायणनामनिर्मलंस्मरामिनारायणतत्त्वम
व्ययम् ॥ ६०॥ ॥शौनकउवाच॥ ॥स्मृत्वा
सकलकल्याणभाजनोयत्रजायते ॥ पुरुष
स्तमजंनित्यंव्रजामिशरणंहरिम् ॥६१॥ ॥ग
र्गउवाच॥ ॥नारायणोतिमंत्रोस्तिवागस्तिव

शवर्त्तिनी ॥ तथापिनरकेघोरेपतंतीत्येत द-
द्भुतं ॥६२॥ ॥दाल्भ्यउवाच॥ ॥किंनस्यब
हुभिर्मंत्रैर्भक्तिर्यस्यजनार्दने ॥ नमोनारायण
येतिमंत्रःसर्वार्थसाधकः ॥६३॥ ॥वैशंपाय
नउवाच ॥ ॥यत्रयोगेश्वरःकृष्णोयत्रपार्थो
धनुर्धरः ॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्म
निर्मम ॥६४॥ ॥अंगिराउवाच॥ ॥हरिर्हर
तिपापानिदुष्टचित्तैरपिस्मृतः ॥ अनिच्छया-
पिसंस्पृष्टोदहत्येवहिपावकः॥६५॥ ॥परा-
शरउवाच ॥ ॥सकृदुच्चरितंयेनहरिरित्यक्षर
द्वयं ॥बद्धःपरिकरस्तेनमोक्षायगमनंप्रति॥
६६॥ ॥पौलस्त्यउवाच॥ ॥हेजिव्हेरससार
ज्ञेसर्वदामधुरप्रिये ॥नारायणाख्यपीयूषंपि
बजिव्हेनिरंतरं ॥६७॥ ॥व्यासउवाच॥ ॥
सत्यंसत्यंपुनःसत्यंभजमुत्थृत्यचोच्यते ॥

नवेदाच्चपरंशास्त्रंनदेवःकेशवात्परः ॥ ६८ ॥
॥ धन्वंतरिरुवाच ॥ ॥ अच्युतानंतगोविंद ना
मोच्चारणभेषजात् ॥ नश्यंतिसकलारोगाः
सत्यंसत्यंवदाम्यहं ॥ ६९ ॥ ॥ मार्कंडेयउवा-
च ॥ ॥ साहानिस्तन्महच्छिद्रंसाचांधजड-
मूढता ॥ यन्मुहूर्तंक्षणंवापिवासुदेवंनचिं-
तयेत् ॥ ७० ॥ ॥ अगस्त्यउवाच ॥ ॥ निमि
षंनिमिषार्धंवा प्राणिनांविष्णुचिंतनम् ॥-
क्रतुकोटिसहस्राणांध्यानमेकंविशिष्यते
॥ ७१ ॥ मनसाकर्मणावाचायेस्मरंतिजना
र्दनं ॥ तत्रतत्रकुरुक्षेत्रंप्रयागोनैमिषंवनं ॥
॥ ७२ ॥ ॥ श्रीशुकउवाच ॥ ॥ आलोड्यस
र्वशास्त्राणिविचार्यैवंपुनःपुनः ॥ इदमेकं-
सुनिष्पन्नंध्येयोनारायणःसदा ॥ ७३ ॥ ॥
श्रीमहादेवउवाच ॥ ॥ शरीरंचनवच्छिद्रंव्या

धिग्रस्तंकलेवरं ॥ औषधंजान्हवीतोयंवै
द्योनारायणोहरिः ॥ ७४ ॥ ॥शौनकउवा-
च ॥ ॥भोजनाच्छादनेचिंतांवृथाकुर्वंतिवैष्ण
वाः ॥योसौविश्वंभरोदेवःसभक्तान्किमुपेक्ष
ते ॥७५॥ एवंब्रह्मादयोदेवाऋषयश्चतपोध
नाः ॥ कीर्तयंतिसुरश्रेष्ठंदेवंनारायणंविभुम्
॥७६॥ ॥सनत्कुमारउवाच ॥ ॥यस्यहस्तेग
दाचक्रंगरुडोयस्यवाहनं ॥शंखःकरतलेय-
स्यसमेविष्णुःप्रसीदतु ॥७७॥ इदंपवित्रमा
युष्यंपुण्यंपापप्रणाशनं ॥यःपठेत्प्रातरु-
त्थायवैष्णवंस्तोत्रमुत्तमम् ॥ ७८ ॥ सर्वपाप
विनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ धर्मा
र्थकाममोक्षार्थंपाडवैःपरिकीर्तितम् ॥ ७९ ॥
आकाशात्पतितंतोयंयथागच्छतिसागरं ॥
सर्वदेवनमस्कारः केशवंप्रतिगच्छति ॥८०

इतिश्रीपांडवकृतप्रपन्नगीतासंपूर्णा ॥

इतिपांडवगीता समाप्ता.

---

## सप्तश्लोकीगीताप्रारंभः

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्री-
गुरुभ्योनमः॥ ओमित्येकाक्षरंब्रह्मव्याहर
न्मामनुस्मरन् ॥ यःप्रयातित्यजन्देहंसया-
तिपरमांगतिम् ॥१॥ स्थानेहृषीकेशतवप्र
कीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच ॥ रक्षांसि
भीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसं
घाः॥२॥ सर्वतःपाणिपादंतत्सर्वतोक्षिशि
रोमुखं॥ सर्वतःश्रुतिमल्लोकेसर्वमावृत्यति
ष्ठति॥३॥ कविंपुराणमनुशासितारमणोर
णीयांसमनुस्मरेद्यः ॥ सर्वस्यधातारमचिं
त्यरूपमादित्यवर्णंतमसःपरस्तात् ॥४॥ऊ

र्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययं ॥ छंदां-
सियस्यपर्णानियस्तंवेदसवेदवित् ॥ ५ ॥ सर्व
स्यचाहंहृदिसन्निविष्टोमत्तःस्मृतिर्ज्ञानमपो
हनंच ॥ वेदैश्चसर्वैरहमेववेद्योवेदांतकृद्वेदवि
देवचाहं ॥ ६ ॥ मन्मनाभवमद्भक्तोमद्याजीमां
नमस्कुरु ॥ मामेवैष्यसियुक्त्वैवमात्मानंमत्प-
रायणः ॥ ७ ॥ ॥इतिश्रीमद्भगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुन
संवादेसप्तश्लोकीगीतासमाप्ता ॥

इतिसप्तश्लोकीगीतासमाप्ता.

---

## चतुःश्लोकिभागवतप्रारंभः

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगु
रुभ्योनमः ॥ ॥श्रीभगवानुवाच ॥ ॥ज्ञानंपर
मगुह्यंमेयद्विज्ञानसमन्वितं ॥ सरहस्यंतदं

गंचगृहाणगदितंमया ॥१॥ यावानहंयथाभा
वोयद्रूपगुणकर्मकः ॥ तथैवतत्त्वविज्ञानमस्तु
तेमदनुग्रहात् ॥२॥ अहमेवासमेवाग्रेनान्य
द्यत्सदसत्परम् ॥ पश्चादहंयदेतच्चयोऽवशि
ष्येतसोऽस्म्यहं ॥३॥ ऋतेऽर्थंयत्प्रतीयेतनप्र
तीयेतचात्मनि ॥ तद्विद्यादात्मनोमायांयथा
भासोयथातमः ॥४॥ यथामहांतिभूतानि-
भूतेषूच्चावचेष्वनु ॥ प्रविष्टान्यप्रविष्टानितथा
तेषुनतेष्वहम् ॥५॥ एतावदेवजिज्ञास्यंतत्त्व
जिज्ञासुनात्मनः ॥ अन्वयव्यतिरेकाभ्यांय-
त्स्यात्सर्वत्रसर्वदा ॥६॥ एतन्मतंसमातिष्ठप
रमेणसमाधिना ॥ भवान्कल्पविकल्पेषुनवि
मुह्यतिकर्हिचित् ॥७॥ ॥इतिश्रीभागवतेम
हापुराणेअष्टादशसाहस्र्यांसंहितायांवैय्या
सिक्यांद्वितीयस्कंधेभगवद्ब्रह्मसंवादेचतुः

श्लोकीभागवतंसमाप्तम् ॥ ॥श्रीकृ०मस्त०

इतिचतुःश्लोकीभागवतंसमाप्तं

## अथशिवकवचप्रारंभः

श्रीगणेशायनमः ॥ ॥अस्यश्रीशिवकवचस्तो
त्रमंत्रस्य ॥ ब्रह्माऋषिः ॥ अनुष्टुप्छंदः ॥श्री
सदाशिवरुद्रोदेवता ॥ ह्रींशक्तिः ॥ रंकीलकं
॥ श्रींह्रींक्लींबीजम् ॥ श्रीसदाशिवप्रीत्यर्थे
शिवकवचस्तोत्रजपेविनियोगः ॥ अथन्या
सः ॥ ॥ओंनमोभगवतेज्वलज्ज्वालामालिने
ओंह्रांसर्वशक्तिधाम्नेईशानात्मने अंगुष्ठा-
भ्यांनमः ॥ ओंनमोभगवतेज्वलज्ज्वालामा
लिने ओंनंरिंनित्यतृप्तिधाम्नेतत्पुरुषात्मने-
तर्जनीभ्यांनमः ॥ ओंनमोभगवतेज्वलज्ज्वा
लामालिने ओंमंरुंअनादिशक्तिधाम्ने अघो

रात्मनेमध्यमाभ्यांनमः ॥ ओंनमोभगवतेज्व
लज्ज्वालामालिने ओंशिंरैंस्वतंत्रशक्तिधाम्ने
वामदेवात्मने अनामिकाभ्यांनमः ॥ ओंनमो
भगवतेज्वलज्ज्वालामालिने ओंवांरौंअलुप्त-
शक्तिधाम्ने सद्योजातात्मने कनिष्ठिकाभ्यांनमः
॥ ओंनमोभगवतेज्वलज्ज्वालामालिने ओंयं
रः अनादिशक्तिधाम्ने सर्वात्मने करतलकरपृ
ष्ठाभ्यांनमः ॥ ॥एवंहृदयादि ॥ ॥अथध्या
नं॥ ॥वज्रदंष्ट्रंत्रिनयनंकालकंठमरिंदमं ॥स
हस्रकरमत्युग्रंवंदेशंभुमुमापतिम् ॥१॥ अ
थापरंसर्वपुराणगुह्यंनिःशेषपापौघहरंपवि
त्रं ॥जयप्रदंसर्वविपत्प्रमोचनंवक्ष्यामिशैवं
कवचंहितायते ॥२॥ ॥ऋषभउवाच॥ ॥न
मस्कृत्वामहादेवं विश्वव्यापिनमीश्वरम् ॥ व-
क्ष्येशिवमयंवर्मसर्वरक्षाकरंनृणाम् ॥३॥ शु

चौदेशे समासीनो यथावत्कल्पितासनः ॥ जितेंद्रियो जितप्राणश्चिंतयेच्छिवमव्ययं ॥ ४ ॥ हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसाव्याप्तनभोवकाशम् ॥ अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशम् ॥ ५ ॥ ध्यानावधूताखिलकर्मबंधश्चिरंचिदानंदनिमग्नचेताः ॥ षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षां ॥ ६ ॥ मां पातु देवोखिलदेवतात्मा संसारकूपे पतितं गभीरे ॥ तन्नामदिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ७ ॥ सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ॥ अणोरणीयानुरुशक्तिरेकः सईश्वरः पातु भयादशेषात् ॥ ८ ॥ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोष्टमूर्तिः ॥ योपांस्वरूपेण नृणां करोति संजीवनं सो वतु मां

जलेभ्यः ॥९॥ कल्पावसानेभुवनानिदग्ध्वा-
सर्वाणियोनृत्यतिभूरिलीलः ॥ सकालरुद्रोव
तुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चतापात् ॥१०
॥ प्रदीप्तविद्युत्कनकावभासोविद्यावराभीतिकु
ठारपाणिः ॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां
स्थितोरक्षतुमामजस्रम् ॥११॥ कुठारवेदांकु-
शपाशशूलकपालढक्काक्षगुणान्दधानः ॥ चतु
र्मुखोनीलरुचिस्त्रिनेत्रः पायादघोरोदिशिदक्षि
णस्याम् ॥१२॥ कुंदेंदुशंखस्फटिकावभासोवे
दाक्षमालावरदाभयांकः ॥ त्र्यक्षश्चतुर्वक्त्रउरु
प्रभावःसद्योधिजातोवतुमांप्रतीच्यां ॥१३॥ व
राक्षमालाभयटंकहस्तः सरोजकिंजल्कसमा
नवर्णः ॥ त्रिलोचनश्चारुचतुर्मुखोमांपायादु
दीच्यांदिशिवामदेवः ॥१४॥ वेदाभयेष्टांकु-
शपाशटंककपालढक्काक्षकशूलपाणिः ॥-

सितद्युतिः पंचमुखोवतान्मामीशानऊर्ध्वंप
रमप्रकाशः ॥१५॥ मूर्धानमव्यान्ममचंद्रमौ
लिर्भालंममाव्यादथभालनेत्रः ॥ नेत्रेममा-
व्याद्भगनेत्रहारीनासांसदारक्षतुविश्वनाथः
॥१६॥ पायाच्छ्रुतीमेश्रुतिगीतकीर्तिःकपोल
मव्यात्सततंकपाली ॥ वक्त्रंसदारक्षतुपंचव
क्त्रोजिह्वांसदारक्षतुवेदजिह्वः ॥१७॥ कंठं-
गिरीशोवतुनीलकंठःपाणिद्वयंपातुपिनाकपा
णिः ॥ दोर्मूलमव्यान्ममधर्मबाहुर्वक्षस्थलं
दक्षमखांतकोव्यात् ॥१८॥ ममोदरंपातुगि
रींद्रधन्वामध्यंममाव्यान्मदनांतकारी ॥ हेरं
बतातोममपातुनाभिंपायात्कटिंधूर्जटिरीश्व
रोमे ॥१९॥ ऊरुद्वयंपातुकुबेरमित्रोजानुद्वयं
मेजगदीश्वरोव्यात् ॥ जंघायुगंपुंगवकेतुरव्या
त्पादौममाव्यात्सुरवंद्यपादः ॥२०॥ महेश्वरः

पातुर्दिनादियामे मां मध्ययामेऽवतु वामदेवः ॥ त्रियंबकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे ॥२१॥ पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां निशीथे ॥ गौरीपतिः पातु निशावसाने मृत्युंजयो रक्षतु सार्वकालम् ॥२२॥ अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम् ॥ तदंतरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात् ॥२३॥ तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतं प्रमथाधिनाथः ॥ वेदांतवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥२४॥ मार्गेषु मां रक्षतु नीलकंठः शैलादिदुर्गेषु पुरत्रयारिः ॥ अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥२५॥ कल्पांतकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलितांडकोशः ॥ घोरारिसेनार्णवदुर्नि

घोरमहाभयाद्रक्षतुवीरभद्रः ॥ २६ ॥ पत्त्य-
श्वमातंगघटावरूथसहस्रलक्षायुतकोटि
भीषणाम् ॥ अक्षौहिणीनांशतमाततायिनां
छिंद्यान्मृडोघोरकुठारधारया ॥ २७ ॥ निहंतु
दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांत-
कस्य ॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रास
यत्वीशधनुः पिनाकः ॥ २८ ॥ दुःस्वप्नदुःश
कुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदु
र्यशांसि ॥ उत्पाततापविषभीतिमसद्ग्रहार्ति
व्याधींश्चनाशयतुमेजगतामधीशः ॥ २९ ॥
ओंनमोभगवतेसदाशिवायसकलतत्त्वात्म-
काय सर्वमंत्रस्वरूपायसर्वयंत्राधिष्ठितायस
र्वतंत्रस्वरूपायसर्वतत्वविदूरायब्रह्मरुद्राव-
तारिणेनीलकंठायपार्वतीमनोहरप्रियायसो
मसूर्याग्निलोचनायभस्मोद्धूलितविग्रहायम

हामणिमुकुटधारणाय माणिक्यभूषणाय-सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारैकनिलयाय तत्त्वातीताय गंगाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदांतसाराय त्रिवर्गसाधनायानंतकोटिब्रह्मांडनायकायानंतवासुकितक्षककर्कोटकशंखकुलिकपद्ममहापद्मेत्यष्टमहानागकुलभूषणाय प्रणवस्वरूपाय चिदाकाशायाकाशदिक्स्वरूपाय ग्रहनक्षत्रमालिने सकलाय कलंकरहिताय सकललोकैककर्त्रे सकललोकैकसंहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवेदांतपारगाय सकललोकैकवरप्रदाय सकललोकैकशंकराय शशांकशेखराय शाश्वतनिजावासाय निराभासाय निरामयाय निर्मलाय-

निर्लोभाय निर्मदाय निश्चिंताय निरहंकारा-
य निरंकुशाय निष्कलंकाय निर्गुणाय निष्का
माय निरुपप्लुवाय निरवद्याय निरंतराय निः
ष्कारणाय निरंतकाय निष्प्रपंचाय निःसंगाय
निर्द्वंद्वाय निराधाराय नीरागाय निष्क्रोधाय नि
र्मलाय निष्पापाय निर्भयाय निर्विकल्पाय निर्भे
दाय निष्क्रियाय निस्तुलाय निःसंशयाय निरं
जनाय निरुपमविभवाय नित्यशुद्धबुद्धपरिपू
र्णसच्चिदानंदाद्वयाय परमशांतस्वरूपाय तेजो
रूपाय तेजोमयाय जय जय रुद्र महारौद्र भद्रा
वतार महाभैरव कालभैरव कल्पांतभैरव कपा
लमालाधर खट्वांग खड्ग चर्म पाशांकुश डमरु
शूल चाप बाण गदा शक्ति भिंडिमाला तोमर मु
सल मुद्गर पाश परिघ भुशुंडी शतघ्नी चक्रा
द्यायुध भीषणकर सहस्रमुख दंष्ट्राकराल वद

नविकराट्टहासविस्फारितब्रह्मांडमंडल नागेंद्र
कुंडल नागेंद्रहारनागेंद्रवलय नागेंद्रचर्मधरमृ
त्युंजयत्र्यंबकत्रिपुरांतक विश्वरूप विरूपाक्ष
विश्वेश्वर वृषभवाहन विश्वतोमुख सर्वतोरक्ष
रक्षमां ज्वलज्ज्वलमहामृत्युमपमृत्युभयंना
शयनाशय चोरभयमुत्सादयोत्सादय विष-
सर्पभयंशमयशमयचोरान्मारयमारयमम
शत्रूनुच्चाटयोच्चाटय त्रिशूलेन विदारय विदा-
रयकुठारेणाभिंधिभिंधि खड्गेन छिंधि छिंधि ख
ट्वांगेन विपोथय विपोथय मुसलेन निष्पेषय नि
ष्पेषय बाणैः संताडय संताडय रक्षांसि भीषय
भीषय भूतानि विद्रावय कूष्मांडवेतालमारी-
गणब्रह्मराक्षसगणान्संत्रासयसंत्रासयममा
भयंकुरुकुरु वित्रस्तंमामाश्वासयाश्वासय न
रक महा भयान्मामुद्धरोद्धर संजीवय संजीव

यविद्रावयक्षुत्तृड्भ्यांमामाप्यायप्याप्याय-
यदुःखातुरंमामानंदयानंदयशिवकवचेनमा
माच्छादयाच्छादयमृत्युंजयत्र्यंबकसदाशिव
नमस्तेनमस्ते ॥ ॥ऋषभउवाच॥ ॥इत्येत-
त्कवचंशैवंवरदंव्याहृतंमया ॥ सर्वबाधाप्रश
मनंरहस्यंसर्वदेहिनाम् ॥१॥ यःसदाधारये-
न्मर्त्यःशैवंकवचमुत्तमम् ॥ नतस्यजायतेक्वा
पिभयंशंभोरनुग्रहात् ॥२॥ क्षीणायुःप्रा-
प्तमृत्युर्वामहारोगहतोपिवा ॥ सद्यःसुखम
वाप्नोतिदीर्घमायुश्चविंदति ॥३॥ सर्वदारि-
द्र्यशमनंसौमंगल्यविवर्धनम् ॥ योधत्तेकव
चंशैवंसदेवैरपिपूज्यते ॥४॥ महापातकसं
घातैर्मुच्यतेचोपपातकैः ॥ देहांतेमुक्तिमाप्नो
तिशिववर्मानुभावतः ॥५॥ त्वमपिश्रद्धयावं
त्सशैवंकवचमुत्तमम् ॥ धारयस्वमयादत्तंस

घ्यः श्रेयोह्यवाप्स्यसि ॥ ६ ॥ ॥ सूतउवाच ॥
इत्युक्त्वा ऋषभोयोगी तस्मैपार्थिवसूनवे ॥
ददौशंखंमहारावंखड्गंचारिनिषूदनम् ॥ ७ ॥
पुनश्चभस्मसंमंत्र्यतदंगंपरितोऽस्पृशन् ॥
गजानांषट्सहस्रस्यद्विगुणस्यबलंददौ ॥ ८
॥ भस्मप्रभावात्संप्राप्तबलैश्वर्यधृतिस्मृतिः
॥ सराजपुत्रः शुशुभेशरदर्कइवश्रिया ॥ ९
॥ तमाहप्रांजलिंभूयः सयोगीनृपनंदनम् ॥
एषखड्गोमयादत्तस्तपोमंत्रानुभाविनः ॥ १०
॥ शितधारमिमंखड्गंयस्मैदर्शयसेस्फुटम् ॥
ससद्योम्रियतेशत्रुः साक्षान्मृत्युरपिस्वय-
म् ॥ ११ ॥ अस्यशंखस्यनिर्ह्रादंयेशृण्वंतिन
वाहिताः ॥ तेमूर्छिताःपतिष्यंतिन्यस्तशा
स्त्राविचेतनाः ॥ १२ ॥ खड्गशंखाविमौदि-
व्यौपरसैन्यविनाशिनौ ॥ आत्मसैन्यस्वप-

क्षाणांशौर्यंतेजोविवर्धनौ ॥१३॥ एतयोश्च
प्रभावेनशैवेनकवचेनच ॥ द्विषट्सहस्त्रना
गानांबलेनमहताऽपिच ॥१४॥ भस्मधार-
णसामर्थ्याच्छत्रुसैन्यंविजेष्यसि ॥ प्राप्यसिं
हासनंपित्र्यंगोप्तासिपृथिवीमिमां ॥१५॥ इ
तिभद्रायुषंसम्यगनुशास्यसमातृकं ॥ ताभ्यां
संपूजितःसोथयोगीस्वैरगतिर्ययौ ॥१६॥
॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडे शिववर्मक
थनंनामद्वादशोऽध्यायः ॥१२॥ ॥७॥ ॥

इतिशिवकवचंसमाप्तं

---

## अथशिवमानसपूजाप्रारंभः

श्रीगणेशायनमः ॥ अथशिवमानसपूजाप्रा
रंभः ॥ रत्नैःकल्पितमासनंहिमजलैःस्नानं-
चदिव्यांबरंनानारत्नविभूषितंमृगमदामो-

दांकितंचंदनं ॥ जातीचंपकबिल्वपत्ररचितंपु
ष्पंचधूपंतथादीपंदेवदयानिधेपशुपतेहृत्क
ल्पितंगृह्यतां ॥ १ ॥ सौवर्णेमणिखंडरत्नरचि
तेपात्रेघृतंपायसंभक्ष्यंपंचविधंपयोदधियु
तंरंभाफलंपानसं ॥ शाकानामयुतंजलंरु-
चिकरंकर्पूरखंडोज्वलंतांबूलंमनसामयावि
विरचितंभक्त्याप्रभोस्वीकुरु ॥ २ ॥ छत्रंचाम
रयोर्युगंव्यजनकंचादर्शनंनिर्मलंवीणाभेरिमृ
दंगकाहलकलागीतंचनृत्यंतथा ॥ साष्टांगंप्र
णतिस्तुतिर्बहुविधाएतत्समस्तंमयासंकल्पे
नसमर्पितंतवविभोपूजांगृहाणप्रभो ॥ ३ ॥-
आत्मात्वंगिरिजामतिःसहचराःप्राणाःशरी
रंगृहंपूजातेविषयोपभोगरचनानिद्रासमा-
धिस्थितिः ॥ संचारःपदयोःप्रदक्षिणविधिः
स्तोत्राणिसर्वागिरोयद्यत्कर्मकरोमितत्तदखि

लंशंभोतवाराधनम् ॥ ४ ॥ करचरणकृतंवा-
कायजंकर्मजंवाश्रवणनयनजंवा मानसंवाप
राधम् ॥ विहितमविहितंवासर्वमेतत्क्षमस्व
जयजयकरुणाब्धेश्रीमहादेवशंभो ॥५॥ ॥
इति शिवमानसपूजासमाप्ता.

---

अथशिवापराधक्षमापनस्तोत्रप्रारं०

श्रीगणेशायनमः ॥ ॥आदौकर्मप्रसंगात्क-
लयतिकलुषंमातृकुक्षौस्थितंमांविण्मूत्रामे-
ध्यमध्येक्कथयतिनितरांजाठरोजातवेदाः ॥
यद्यद्वैतत्रदुःखंव्यथयतिनितरांशक्यतेकेन
वक्तुंक्षंतव्योमेपराधः शिवशिव शिव भोश्रीम
हादेवशंभो ॥१॥ बाल्येदुःखातिरेकान्मललु
लितवपुः स्तन्यपानेपिपासानोशक्यश्चेंद्रिये
भ्योभवगुणजनिताजंतवोमांतुदंति ॥ नाना-

रोगादिदुःखाद्रुदनपरवशःशंकरंनस्मरामिक्षं
तव्योमेपराधःशिवशिवशिवभोश्रीमहादेवशं
भो ॥२॥ प्रौढोहंयौवनस्थोविषयविषधरैःपं
चभिर्मर्मसंधौदष्टोनष्टोविवेकःसुतधनयुवति
स्वादुसौख्येनिषण्णः ॥ शैवीचिंताविहीनंमम-
हृदयमहोमानगर्वाधिरूढंक्षंतव्योमेपराधः
शिवशिवशिवभोश्रीमहादेवशंभो ॥३॥ वा-
र्द्धक्येचेंद्रियाणांविगतगतिमतिश्चाधिदैवा-
दितापैःपापैरोगैर्वियोगैस्त्वनवशितवपुःप्रौ
ढिहीनंचदीनं ॥ मिथ्यामोहाभिलाषैर्भ्रमति
ममनोधूर्जटेध्यानशून्यंक्षंतव्योमेपराधः-
शिवशिवशिवभोश्रीमहादेवशंभो ॥४॥ नो
शक्यंस्मार्तकर्मप्रतिपदगहनप्रत्यवायाकु
लाढ्यंश्रौतेवार्ताकथंमेद्विजकुलविहितेब्रह्म
मार्गेसुसारे ॥ ज्ञातोधर्मोविचारैःश्रवणमनन

यो: किंनिदध्यासितव्यंक्षंतव्योमेपराधः शि वशिवशिवभोश्रीमहादेवशंभो ॥५॥ स्नात्वाप्रत्यूषकालेस्नपनविधिविधौनाहृतंगांगतोयंपूजार्थंनाकदाचिद्बहुतरगहनात्खंडबिल्वीदलानि ॥ नानीतापद्ममालासरसिविकसितागंधपुष्पैस्त्वदर्थंक्षंतव्योमेपराधः शिवशिव-शिवभोश्रीमहादेवशंभो ॥६॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितंनैवलिंगंनोलिप्तंचंदनाद्यैः कनकविरचितंपूजितंनप्रसूनैः ॥ धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैवभक्ष्योपहारैः क्षंतव्योमेपराधः शिवशिवशिवभो-श्रीमहादेवशंभो ॥७॥ ध्यात्वाचित्तेशिवाख्यंप्रचुरतरधनंनैवदत्तंद्विजेभ्योहव्यंतेलक्षसंख्यैर्हुतवहवदनेनार्पितंबीजमंत्रैः ॥ नोतप्तंगांगतीरेव्रतजपनियमैरुद्रजाप्यैर्नदेवंक्षंतं-

व्योमेपराधः शिवशिवशिवभोश्रीमहादेवशंभो ॥ ८ ॥ स्थित्वास्थानेसरोजेप्रणवमयमरुत्कुंडलेसूक्ष्ममार्गेशांतेस्वांतेप्रलीनेप्रकटितविभवेज्योतिरूपेपराख्ये ॥ लिंगज्ञेब्रह्मवाक्येसकलतनुगतंशंकरंनस्मरामिक्षंतव्योमेपराधः शिवशिवशिवभोश्रीमहादेवशंभो ॥ ९ ॥ नग्नोनिःसंगशुद्धस्त्रिगुणविरहितोध्वस्तमोहांधकारोनासाग्रेन्यस्तदृष्टिर्विदितभवगुणोनैवदृष्टःकदाचित् ॥ उन्मन्यावस्थयात्वांविगतकलिमलंशंकरंनस्मरामिक्षंतव्योमेपराधः शिवशिवशिवभोश्रीमहादेवशंभो ॥ १० ॥ चंद्रोद्भासितशेखरेस्मरहरेगंगाधरेशंकरेसर्पैर्भूषितकंठकर्णविवरेनेत्रोत्थवैश्वानरे ॥ दंतित्वक्कृतसुंदरांबरधरेत्रैलोक्यसारेहरेमोक्षार्थंकुरुचित्तवृत्तिमखिलामन्यै-

स्कृ किं कर्मभिः ॥ ११ ॥ किं वानेन धनेन वाजि करिभिः प्राप्तेन राज्येन किं किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम् । ज्ञात्वैतत्क्षणभंगुरं सपदि रे त्याज्यं मनो दूरतः स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥ १२ ॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायांति गताः पुनर्न दिवसाः कालो जगद्भक्षकः । लक्ष्मीस्तोयतरंगभंगचपला विद्युच्चलं जीवितं तस्मात्त्वां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥ १३ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वापराधं । विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शंभो ॥ १४ ॥ ॥ इति श्रीमच्छंकराचार्यविरचितं अपराधक्षमास्तोत्रं संपूर्णम् ॥ ॥ ६ ॥ ॥ समाप्ता ॥

# श्रीशिवपंचाक्षरीस्तोत्र प्रारंभः ॥

श्रीगणेशायनमः॥ ॥नागेंद्रहाराय त्रिलोचना
यभस्मांगरागाय महेश्वराय ॥ देवाधिदेवाय
दिगंबरायतस्मैनकारायनमः शिवाय ॥ १ ॥मा
नंगचर्मांबरभूषणायसमस्तगीर्वाणगणार्चि
ताय ॥ त्रैलोक्यनाथत्रिपुरांतकाय तस्मैम:
कारायनमः शिवाय ॥ २॥ शिवामुखांभोज
विकासिनायदक्षस्ययज्ञस्थितिनाशकाय॥
चंद्रार्कवैश्वानरलोचनायतस्मैशिकारायन
मः शिवाय ॥ ३॥ वसिष्ठकुंभोद्भवगौतमादि
भिर्मुनींद्रवंद्यायगिरीश्वराय ॥श्रीनीलकंठा
यवृषध्वजायतस्मैवकारायनमः शिवाय ॥
४॥ यज्ञस्वरूपायजटाधरायपिनाकहस्ता
यसनातनाय ॥ नित्यायशुद्धायनिरंजनाय
तस्मैयकारायनमः शिवाय ॥ ५॥ एतद्यःपं

ठतेनित्यंशङ्करचित्तद्गतमानसः ॥ शिवेनसह
तादात्म्यंलभतेनात्रसंशयः ॥ ६ ॥ पूजाव-
सानसमयेपठेद्यःपार्वतीपतेः ॥ सयाति-
परमान्भोगान्भुक्त्वांतेशिवसन्निधौ ॥ ७
॥ एतद्व्यासकृतंस्तोत्रंशिवसान्निध्यकारकं
॥ एकादश्यांसोमवारेप्रदोषेवाविशेषतः॥
८॥ यःपठेत्परयाप्रीत्यासस्वयंहिशिवोभवे
त् ॥पुत्रपौत्रधनंधान्यंपरांश्रियमवाप्नुयात्
॥९॥ इतिश्रीलिंगपुराणांतर्गतश्रीशिवपञ्चा
क्षरीमहामंत्रस्तोत्रंसमाप्तिमगमत् ॥ ॥

---

## अथशिवस्तुतिप्रारंभः

श्रीगणेशायनमः ॥ ॥स्फुटंस्फटिकसप्रभं-
स्फुटितहारकश्रीजटंशशांकदलशेखरंकपि-
लफुल्लनेत्रत्रयं ॥ तरक्षुवरकृत्तिमद्भुजगभू

षणं भूतिमल्कदानुशितिकंठतेवपुरवेक्ष्सतेवी-
क्षणं ॥ १ ॥ त्रिलोचनविलोचनेलसतितेललाः
मायितेस्मरोनियमघस्मरो नियमिनामभूद्र
स्मसात् ॥ स्वभक्तिलतयावशीकृतवतीसती
यंसतीस्वभक्तवशतो भवानपिवशीप्रसीदप्र
भो ॥ २ ॥ महेशमहितोसितत्पुरुषपूरुषाग्रो
भवानघोररिपुघोरतेनवमवामदेवांजलिः
॥ नमःसपदिजाततेत्वमितिपंचरूपोंचितः
प्रपंचयचपंचवृन्ममनस्तमस्ताडय ॥ ३ ॥
रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्ट
षुनिविष्टमित्यजभजामिमूर्त्यष्टकं ॥ प्रशांत-
मुनभीषणंभुवनमोहनंचेत्यहोवपूंषिगुणभू
षितेहमहमात्मनोहंभिदे ॥ ४ ॥ विमुक्तिपरम
ध्वनांतवषडध्वनामास्पदंपदंनिगमवेदिनो
जगतिवामदेवादयः ॥ कथंचिदुपशिक्षिता

भगवतेवसंविद्रतेवयंतुविरलांनराः कथमुमे
शतन्मन्महे ॥५॥ कठोरितकुठारया ललितशूल
याबाहयारणडमरुणा स्फुरद्धरिणयासख-
ड्गया ॥ चलाभिरचलाभिरप्यगणिताभि-
रुन्नृत्यतश्चतुर्दशजगंतितेजयजयेत्ययुर्वि-
स्मयं ॥ ६ ॥ पुरत्रिपुररंधनंविविधदैत्यविध्वं
सनंपराक्रमपरंपरा अपिपरानतेविस्मयः ॥
अमर्षबलहर्षितक्षुभितवृत्तनेत्रोज्ज्वलज्ज्व
लज्ज्वलनहेलयाशलभितंहिलोकत्रयं ॥ ७
॥ सहस्रनयनोगुहः सहसहस्ररश्मिर्विधुर्बृ
हस्पतिरुतापतिः ससुरसिद्धविद्याधराः ॥
भवत्पदपरायणाः श्रियमिमांययुः प्रार्थिनां
भवान्सुरतरुईशंदिशशिवांशिवावल्लभ ॥
॥ ८ ॥ तवप्रियतमादतिप्रियतमंसदैवांतरंप
यस्युपहितंघृतंस्वयमिवश्रियोवल्लभ ॥ वि-

भिद्यल्लघुबुद्धयः स्वपरपक्षलक्षायितंपठंति हि स्तुवंतिनेशाठहृदःशठाशठंधिना: ॥ ९ ॥ निवासनिलयाचिनातवशिरस्ततिर्मौलिकाकपालमपिनेकरेत्वमशिवोस्यनंतर्धियां ॥ तथापिभवतःपदंशिवशिवेत्यदोजल्पतामकिंचननकिंचन वृजिनमस्तिभस्मीभवत् ॥१० ॥ त्वमेवकिलकामधक्सकलकाममापूरयन् सदात्रिनयनोभवानवहसिचात्रिनेत्रोद्भवं ॥ विषंविषधरान्दधत्पिबसितेनचानंदवान्विरुद्धचरितोचितानजगदधीशतेभिक्षुता ॥ ११ ॥ नमःशिवशिवाशिवाशिवशिवार्थकृंताशिवंनमोहरहराहराहरहरांतरीमेदृशं ॥ नमोभवभवाभवप्रभवभूतयेमेभवन्नमोमृडनमोनमोनमउमेशतुभ्यंनमः ॥ १२ ॥ सतांश्रवणपद्धतिंसरतुसन्नतोक्तेत्यसौ शिवस्यकरुणां

कुशात्प्रतिकृतास्सदासोचिता ॥ इतिप्रथित
मानसोप्यधितन्नामनारायणः शिवस्तुतिमि
मांशिवांल्लिकुचिसूरिसूनुः सुधीः ॥१३॥ ॥इ
तिश्रीमल्लिकुचिसूरिसूनुनारायणपंडिताचा-
र्यविरचिताशिवस्तुतिःसंपूर्णा ॥ ॥छ॥ ॥

इतिशिवस्तुतिःसमाप्ता

---

## अथरावणकृतशिवतांडवस्तोत्रप्रारं०

श्रीगणेशायनमः ॥ ॥जटाकटाहसंभ्रमभ्र-
मन्निलिंपनिर्झरीविलोलवीचिवल्लरीविराज
मानमूर्धनि ॥ धगद्धगद्धगज्ज्वलल्ललाटपट्ट
पावकेकिशोरचंद्रशेखरेरतिः प्रतिक्षणंमम
॥१॥ धराधरेंद्रनंदिनीविलासबंधबंधुरस्फुर
द्दगंतसंततिप्रमोदमानमानसे ॥ कृपाकटाक्ष
धोरणीनिरुद्धदुर्धरापदिक्कचिच्चिदंबरेमनो-

विनोदमेतुवस्तुनि ॥२॥ जटाभुजंगपिंगल-
स्फुरत्फणामणिप्रभाकदंबकुंकुमद्रवप्रलिप्त-
दिग्वधूमुखे ॥ मदांधसिंधुरस्फुरत्त्वगुत्तरीय
मेदुरे मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥
३॥ सहस्रलोचनप्रभृत्यशेषलेखशेखरप्र
सूनधूलिधोरणी विधूसरांघ्रिपीठभूः ॥ भुजं
गराजमालया निबद्धजाटजूटकः श्रियै चिराय
जायतां चकोरबंधुशेखरः ॥४॥ ललाटच-
त्वरज्वलद्धनंजयस्फुलिंगभानिपीतपंचसाय
कं नमन्निलिंगनायकं ॥ सुधामयूखलेखया
विराजमानशेखरं महाकपालिसंपदे शिरोज
टालमस्तु नः ॥५॥ करालभालपट्टिकाधग
द्धगद्धगज्ज्वलद्धनंजयाधरीकृतप्रचंडपंचसा-
यके ॥ धराधरेंद्रनंदिनीकुचाग्रचित्रपत्रकप्र
कल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ॥६॥

नवीनमेघमंडलीनिरुद्धदुर्धरस्फुरत्कुहूनि
शीथिनीतमःप्रबंधबंधुकंधरः॥ निलिंपनि
र्झरीधरस्तनोतुकृत्तिसिंधुरःकलानिधान-
बंधुरःश्रियंजगद्धुरंधरः॥७॥ प्रफुल्लनीलपं
कजप्रपंचकालिमच्छटाविडंबिकंठकंधरारु
चिप्रबंधकंधरं॥ स्मरच्छिदंपुरच्छिदंभवच्छि
दंमखच्छिदंगजच्छिदांधकच्छिदंतमंतकच्छि
दंभजे॥८॥ अगर्वसर्वमंगलाकलाकदंबमं-
जरीरसप्रवाहमाधुरीविजृंभणामधुव्रतं॥
स्मरांतकंपुरांतकंभवांतकंमखांतकंगजांत-
कांधकांतकंतमंतकांतकंभजे॥९॥ जयत्व
दभ्रविभ्रमभ्रमद्भुजंगमस्फुरद्धगद्धगद्विनि
र्गमत्करालभालहव्यवाट्॥ धिमिद्धिमिद्धि
मिध्वनन्मृदंगतुंगमंगलध्वनिक्रमप्रवर्त्तितप्र
चंडतांडवःशिवः॥१०॥ दृषद्विचित्रतल्पयो

भुजंगमौक्तिकस्रजोर्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ॥ तृणारविंदचक्षुषोः प्रजामहीमहेंद्रयोः समं प्रवर्तयन्मनः कदा सदाशिवं भजे ॥११॥ कदा निलिंपनिर्झरीनिकुंजकोटरे वसन् विमुक्तदुर्मतिः सदा शिरस्थमंजलिं वहन् ॥ विमुक्तलोललोचनो ललामभाललग्नकः शिवेति मंत्रमुच्चरन् कदा सुखी भवाम्यहम् ॥ १२॥ इदं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं पठन् स्मरन्ब्रुवन्नरो विशुद्धिमेति संततं ॥ हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं विमोहनं हि देहिनां सुशंकरस्य चिंतनं ॥ १३॥ पूजावसानसमये दशवक्त्रगीतं यः शंभुपूजनमिदं पठति प्रदोषे ॥ तस्य स्थिरां रथगजेंद्रतुरंगयुक्तां लक्ष्मीं सदैव सुमुखीं प्रददाति शंभुः ॥ १४ ॥ ॥ इति श्री रावणविरचितं शिवतांडव

स्तोत्रंसंपूर्णम् ॥ ॥ ६ ॥ ॥

इतिरावणकृतशिवतांडवस्तोत्रंसमाप्तं

---

## अथउपमन्युकृतस्तोत्रप्रारंभोयम्

श्रीगणेशायनमः ॥ ॥श्रीशंकरःप्रसन्नः॥

जयशंकरपार्वतीपतेमृडशंभोशशिखंडमंडन ॥ मदनांतकभक्तवत्सलप्रियकैलासदयासुधांबुधे ॥१॥ सदुपायकथास्वपंडितोहृदयेदुःखशरेणखंडितः ॥ शशिखंडशिखंडमंडनंशरणंयामिशरण्यमीश्वरम् ॥२॥ महतः परितःप्रसर्पतस्तमसोदर्शनभेदिनोभिदे ॥ दिननाथइवस्वतेजसाहृदयव्योम्निमनागुदेहिनः ॥३॥ नवथंलवच्चर्मचक्षुषापदवीमप्युपवीक्षितुंक्षमाः ॥ कृपयाभयदेनचक्षुषासकलेनेशविलोकया

शङ्ग: ॥ ४ ॥ त्वदनुस्मृतिरेव पावनी स्तुतियुक्ता नहि वक्तुमीशसा ॥ मधुरं हि पयः स्वभावतो ननु कीदृक्सितशर्करान्वितम् ॥ ५ ॥ सविषो ऽप्यमृतायते भवाञ्शवमुंडाभरणोऽपि पावनः ॥ भव एव भवांतकः सतां समदृष्टिर्विषमेक्षणोऽपि सन् ॥ ६ ॥ अपि शूलधरो निरामयो दृढवैराग्यरतोऽपि रागवान् ॥ अपि भैक्ष्यचरो महेश्वरश्चरितं चित्रमिदं हि ते प्रभो ॥ ७ ॥ वितरत्यभिवांछितं दृशा परिदृष्टः किल कल्पपादपः ॥ हृदये स्मृत एव धीमते नमतेऽभीष्टफलप्रदो भवान् ॥ ८ ॥ सहसैव भुजंगपाशवान्विनिगृह्णाति न यावदंतकः ॥ अभयं कुरु तावदाशु मे गतजीवस्य पुनः किमौषधैः ॥ ९ ॥ सविषैरिव भीमपन्नगैर्विषयैरेभिरलं परीक्षितम् ॥ अमृतैरिव संभ्रमेण मामभिषिं

चाशःदयावलोकनैः ॥१०॥ मुनयोबहवोद्य
धन्यतांगमिताः स्वाभिमनार्थदर्शिनः ॥ क-
रुणाकरयेनतेनमामवसन्नंनतुपश्यचक्षु-
षा ॥११॥ प्रणमाम्यथयामिचापरंशरणंकं
कृपणाभयप्रदं ॥ विरहीवविभोप्रियामयंप
रिपश्यामिभवन्मयंजगत् ॥१२॥ बहवोभ
वतानुकंपिताः किमितीशाननमानुकंपसे
॥ दधना किमुमंदराचलंपरमाणुःकमठेनदु
र्धरः ॥१३॥ अशुचिंयदिमानुमन्यसे किमि
दंमूर्ध्निकपालदामते ॥ उतशाठ्यमसाधुसं
गिनंविषलक्ष्मासिनकिंद्विजिव्हधृक् ॥१४
॥ क्वदृशंविदधामिकिंकरोम्यनुतिष्ठामिकथं
भयाकुलः ॥ क्वनुतिष्ठसिरक्षरक्षमामयि-
शंभोशरणागतोऽस्मिते ॥१५॥ विलुठा-
म्यवनौकिमाकुलःकिमुरोहन्मिशिरश्छिन-

श्चिवा ॥ किमुरोदिभिरारटीमिकिंकृपणंमांन यदीक्षसेप्रभो ॥१६॥ शिवसर्वगशर्वशर्मद प्रणतोदेवदयांकुरुष्वमे ॥ नमईश्वरनाथदिक्पतेपुनरेवेशनमोनमोस्तुते ॥१७॥ शरणंतरुणेंदुशेखरः शरणंमेगिरिराजकन्यका ॥ शरणंपुनरेवतावुभौशरणंनान्यदुपैमिदैवतं ॥१८॥ उपमन्युकृतंस्तवोत्तमंजपतःशंभुसमीपवर्तिनः ॥ अभिवांछितभाग्यसंपदः परमायुःप्रददातिशंकरः ॥१९॥ उपमन्युकृतंस्तवोत्तमंप्रजपेद्यस्तुशिवस्यसन्निधौ ॥ शिवलोकमवाप्यसोनिरात्सहतेनैवशिवेनमोदते ॥२०॥ ॥इत्युपमन्युकृतं शिवस्तोत्रंसंपूर्णम् ॥ ॥५॥ ॥

इतिउपमन्युकृतस्तोत्रंसमाप्तं

# अथमहिम्नस्तोत्रप्रारंभः

श्रीगणेशायनमः॥ ॥पुष्पदंतउवाच॥ ॥
महिम्नःपारंतेपरमविदुषोयद्यसदृशीस्तु-
तिर्ब्रह्मादीनामपितदवसन्नास्त्वयिगिरः॥
अथावाच्यःसर्वःस्वमतिपरिणामावधिगृ
णन्ममाप्येषस्तोत्रेहरनिरपवादःपरिकरः
॥१॥ अतीतःपंथानंतवचमहिमावाङ्म
नसयोरतद्व्यावृत्त्यायंचकितमभिधत्तेश्रुति
रपि॥सकस्यस्तोतव्यःकतिविधगुणःक
स्यविषयःपदेत्वर्वाचीनेपततिनमनःक-
स्यनवचः॥२॥मधुस्फीतावाचःपरमममृ
तंनिर्मितवतस्तवब्रह्मन्किंवागपिसुरगुरो
र्विस्मयपदं॥ममत्वेतांवाणींगुणकथनपु-
ण्येनभवतःपुनामीत्यर्थेस्मिन्पुरमथनबु
द्धिर्व्यवसिता॥३॥तवैश्वर्यंयत्तज्जगदुद

यरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तंतिसृषुगुण
भिन्नासुतनुषु ॥ अभव्यानामस्मिन्वरदर-
मणीयामरमणीं विहंतुंव्याक्रोशींविदधत
इहैकेजडधियः ॥ ४ ॥ किमीहः किंकायः-
सखलुकिमुपायस्त्रिभुवनंकिमाधारोधाता
सृजतिकिमुपादानइतिच ॥ अतर्क्यैश्वर्ये-
त्वय्यनवसरदुःस्थोहतधियः कुतर्कोयंकां
श्चिन्मुखरयतिमोहायजगतः ॥ ५ ॥ अज-
न्मानोलोकाः किमवयववंतोऽपिजगताम
धिष्ठातारंकिंभवविधिरनादृत्यभवति ॥ अ
नीशोवाकुर्याद्भुवनजननेकः परिकरोयतोमं
दास्त्वांप्रत्यमरवरसंशेरतइमे ॥ ६ ॥ त्रयीसां
ख्यंयोगः पशुपतिमतंवैष्णवमितिप्रभिन्ने
प्रस्थानेपरमिदमदः पथ्यमितिच ॥ रुचीनां
वैचित्र्यादृजुकुटिलनानापथजुषांनृणामे-

क्षोगम्यस्त्वमसिपयसामर्णवइव ॥ ७॥ महो
क्षः खट्वांगंपरशुरजिनंभस्मफणिनः कपालं
चेतीयत्तववरदतंत्रोपकरणम् ॥ सुरास्तांता
मृद्धिंदधतितुभवद्भ्रूप्रणिहितांनहिस्वात्मा
रामंविषयमृगतृष्णाभ्रमयति ॥८॥ ध्रुवंक
श्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्या
ध्रौव्येजगतिगदतिव्यस्तविषये ॥ समस्ते‍ऽ
प्येतस्मिन्पुरमथनतैर्विस्मितइवस्तुवन्जि
ह्रेमित्वांनखलुननुधृष्टामुखरता ॥९॥ तवै
श्वर्यंयत्नाद्यदुपरिविरिंचोहरिरधः परिच्छेत्तुं
यातावनलमनलस्कंधवपुषः ॥ ततोभक्ति-
श्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थे
ताभ्यांतवकिमनुवृत्तिर्नफलति ॥१०॥ अय
त्नादापाद्यत्रिभुवनमवैरव्यतिकरंदशास्यो-
यद्बाहूनभृतरणकंडूपरवशान् ॥ शिरःपद्म

श्रेणीरचितचरणांभोरुहबलेः स्थिरायाः-
स्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदं ॥ ११ ॥
अमुष्य त्वत्सेवासमधिगतसारं भुजवनं ब-
लात्कैलासेपि त्वदधिवसतौ विक्रमयतः ॥-
अलभ्यापातालेऽप्यलसचलितांगुष्ठशिर
सि प्रतिष्ठा त्वय्यासीत् ध्रुवमुपचितो मुह्य-
ति खलः ॥ १२ ॥ यदृद्धिं सुत्राम्णो वरद परमो
च्चैरपि सतीमधश्चक्रे बाणः परिजनविधेय-
त्रिभुवनः ॥ न तच्चित्रं तस्मिन् वरिवसितरि
त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्व
य्यवनतिः ॥ १३ ॥ अकांडब्रह्मांडक्षयचकि
तदेवासुरकृपाविधेयस्यासीद्यस्त्रिनयन वि
षं संहृतवतः ॥ स कल्माषः कंठे तव न कुरुते
न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभय
भंगव्यसनिनः ॥ १४ ॥ असिद्धार्था नैव क्व-

चिदपिसदेवासुरनरे निवर्तन्तेनित्यंजगतिज
यिनोयस्यविशिखाः ॥ सपश्यन्नीशत्वामित
रसुरसाधारणमभूत्स्मरः स्मर्तव्यात्मानहि-
वशिषुपथ्यः परिभवः ॥१५॥ महीपादाघा
ताद्व्रजतिसहसासंशयपदंपदंविष्णोर्भ्राम्य
द्भुजपरिघरुग्णग्रहगणम् ॥ मुहुर्द्यौर्दौस्थ्यं
यात्यनिभृतजटाताडिततटाजगद्रक्षायैत्वं
नटसिननुवामैवविभुता ॥१६॥ वियद्व्या-
पीतारागणगुणितफेनोद्गमरुचिः प्रवाहोवा
रांयः पृषतलघुदृष्टः शिरसिते ॥ जगद्द्वी-
पाकारंजलधिवलयंतेनकृतमित्यनेनैवो-
न्नेयंधृतमहिमदिव्यंतववपुः ॥१७॥ रथः क्षो
णीयंताशतधृतिरगेंद्रोधनुरथोरथांगेचंद्रा-
र्कौरथचरणपाणिः शरइति ॥ दिधक्षोस्तेको
यंत्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीडंत्यो

नखलुपरतंत्राःप्रभुधियः ॥१८॥ हरिस्ते-
साहस्रंकमलबलिमाधायपदयोर्यदेकोने-
तस्मिन्निजमुदहरन्नेत्रकमलं ॥गतोभक्त्यु
द्रेकःपरिणतिमसौचक्रवपुषात्रयाणांरक्षा
यैत्रिपुरहरजागर्त्तिजगताम् ॥१९॥ क्रतौ-
सुप्तेजाग्रत्त्वमसिफलयोगेक्रतुमतांक्वकर्म
प्रध्वस्तंफलतिपुरुषाराधनमृते ॥ अतस्त्वां
संप्रेक्ष्यक्रतुषुफलदानप्रतिभुवंश्रुतौश्रद्धां
बध्वादृढपरिकरःकर्मसुजनः ॥२०॥ क्रि
यादक्षोदक्षःक्रतुपतिरधीशस्तनुभृतामृ-
षीणामार्त्विज्यंशरणदसदस्याःसुरगणाः
॥ क्रतुभ्रंशस्त्वत्तःक्रतुफलविधानव्यस-
निनोध्रुवंकर्तुःश्रद्धाविधुरमभिचारायहि
मखाः ॥२१॥ प्रजानाथंनाथःप्रसभम-
भिकंस्वांदुहितरंगतंरोहिद्भूतांरिरमयिषुमृ

ष्यस्यवपुषा ॥ धनुष्पाणेर्यातंदिवमपिसप
त्राकृतममुंत्रसंतंतेऽद्यापित्यजतिनमृगव्या
धरभसः ॥२२॥ स्वलावण्याशंसाधृतधनु
षमन्हायतृणवत्पुरः प्लुष्टंदृष्ट्वापुरमथनपु-
ष्पायुधमपि ॥ यदिस्त्रैणंदेवीयमनिरतदे
हार्धघटनादवैतित्वामद्धाबतवरदमुग्धायु
वतयः ॥२३॥ श्मशानेष्वाक्रीडास्मरहरपि
शाचाःसहचराश्चिताभस्मालेपःस्रगपिनृ
करोटीपरिकरः ॥ अमंगल्यंशीलंतवभवतु
नामैवमखिलंतथाऽपिस्मर्तृणांवरदपरमं
मंगलमसि ॥२४॥ मनःप्रत्यक्चित्तेसवि
धमविधायात्तमरुतः प्रहृष्यद्रोमाणःप्रम
दसलिलोत्संगितदृशः ॥ यदालोक्याल्हादं
ह्रदइवनिमज्यामृतमयेदधत्यंतस्तत्त्वंकिम
पियमिनस्तत्किलभवान् ॥२५॥ त्वमर्कस्त्वं

सोमस्त्वमसिपवनस्त्वंहुतवहस्त्वमापस्त्वंव्यो
मत्वमुधरणिरात्मात्वमितिच ॥ परिच्छिन्ना
मेवंत्वयिपरिणताबिभ्रतिगिरंनविद्मस्तत्तत्वं
वयमिहतुयत्त्वंनभवसि ॥ २६ ॥ त्रयींतिस्रो
वृत्तीस्त्रिभुवनमथोत्रीनपिसुरानकाराद्यैर्व
र्णैस्त्रिभिरभिदधत्तीर्णविकृति ॥ तुरीयंतेधा
मध्वनिभिरवरुंधानमणुभिः समस्तंव्यस्तं-
त्वांशरणदगृणात्योमितिपदं ॥ २७ ॥ भवः
शर्वोरुद्रःपशुपतिरथोग्रःसहमहांस्तथाभी
मेशानावितियदभिधानाष्टकमिदं ॥ अमुष्मि
न्प्रत्येकंप्रविचरतिदेवःश्रुतिरपिप्रियायास्मै-
धाम्नेप्रणिहितनमस्योस्मिभवते ॥ २८ ॥ न-
मोनेदिष्ठायप्रियदवदविष्ठायचनमोनमःक्षो
दिष्ठायस्मरहरमहिष्ठायचनमः ॥ नमोवर्षि
ष्ठायंत्रिनयनयविष्ठायचनमोनमःसर्वस्मैते

तदिदमितिशर्वायचनमः ॥२९॥ बहलरज
से विश्वोत्पत्तौभवायनमोनमः प्रबलतमसे
तत्संहारे हरायनमोनमः॥ जनंसुखकृतेस
त्वोत्पत्तौ मृडायनमोनमः प्रमहसिपदेनिस्त्रै
गुण्येशिवायनमोनमः ॥३०॥ कृशपरिण
तिचेतःक्लेशवश्यंक्वचेदंक्वचतवगुणसीमोल्लं
घिनीशश्वदृद्धिः॥ इतिचकितममंदीकृत्य-
मांभक्तिराधाद्वरदचरणयोस्तेवाक्यपुष्पोप
हारं॥३१॥ असितगिरिसमंस्यात्कज्जलं
सिंधुपात्रेसुरतरुवरशाखालेखनीपत्रमुर्वी
॥ लिखतियदिगृहीत्वाशारदासर्वकालंतद-
पितवगुणानामीशपारंनयाति ॥३२॥ असु
रसुरमुनींद्रैरर्चितस्येंदुमौलेर्ग्रथितगुणमहि
म्नोनिर्गुणस्येश्वरस्य॥ सकलगुणवरिष्ठःपु
ष्पदंताभिधानोरुचिरमलघुवृत्तैःस्तोत्रमेत

चकार ॥ ३३ ॥ अहरहरनवद्यं धूर्जटेस्तोत्र
मेतत्पठतिपरमभक्त्याशुद्धचित्तःपुमान्यः
॥ सभवतिशिवलोकेरुद्रतुल्यस्तथात्र प्रचु-
रतरधनायुःपुत्रवान्कीर्तिमांश्च ॥ ३४ ॥ महे
शान्नापरोदेवोमहिम्नोनापरास्तुतिः ॥ अ-
घोरान्नापरोमंत्रोनास्तितत्त्वंगुरोःपरम् ॥
३५ ॥ दीक्षादानंतपस्तीर्थंज्ञानंयागादिकाः
क्रियाः ॥ महिम्नःस्तवपाठस्यकलांनार्हंति
षोडशीं ॥ ३६ ॥ कुसुमदशननामासर्वगंध
र्वराजः शशिधरवरमौलेर्देवदेवस्यदासः ॥
सगुरुनिजमहिम्नोभ्रष्टएवास्यरोषात्स्तव
नमिदमकार्षीद्दिव्यदिव्यंमहिम्नः ॥ ३७ ॥ सु
रवरमुनिपूज्यंस्वर्गमोक्षैकहेतुंपठतियदिम
नुष्यःप्रांजलिर्नान्यचेताः ॥ व्रजतिशिवसमी
पंकिन्नरैःस्तूयमानस्तवनमिदममोघंपुष्प-

दंतप्रणीतम् ॥ ३८ ॥ श्रीपुष्पदंतमुखपंकज निर्गतेनस्तोत्रेणकिल्बिषहरेणहरप्रियेण ॥ कंठस्थितेनपठितेनसमाहितेनसुप्रीणितो-भवतिभूतपतिर्महेशः ॥ ३९ ॥ इत्येषावाङ्मयीपूजाश्रीमच्छंकरपादयोः ॥ अर्पितानेन मांदेवःप्रीयतांचसदाशिवः ॥ ४० ॥ ॥ इति श्रीपुष्पदंतविरचितंमहिम्नःस्तोत्रंसंपूर्णं ॥

इतिमहिम्नस्तोत्रंसमाप्तं

---

## ज्योतिर्लिंगस्तोत्रप्रारंभः

श्रीगणेशायनमः ॥ ॥ सौराष्ट्रदेशेविशदेति रम्येज्योतिर्मयंचंद्रकलावतंसम् ॥ भक्तिप्रदा नायकृपावतीर्णंतंसोमनाथंशरणंप्रपद्ये ॥ १ ॥ श्रीशैलसंगेविबुधातिसंगेतुलाद्रितुंगेपि मुदावसंतम् ॥ तमर्जुनंमल्लिकपूरमेकंनमा

मिसंसारसमुद्रसेतुम् ॥ २॥ अवंतिकायां-
विहितावतारंमुक्तिप्रदानायचसज्जनानाम्-
॥ अकालमृत्योःपरिरक्षणार्थंवंदेमहाकाल
महासुरेशम् ॥ ३॥ कावेरिकानर्मदयोःपवि
त्रेसमागमेसज्जनतारणाय ॥ सदैवमांधा-
तृपुरेवसंतमोंकारमीशंशिवमेकमीडे ॥ ४ ॥
पूर्वोत्तरेप्रज्वलिकानिधानेसदावसंतंगिरि-
जासमेतम् ॥ सुरासुराराधितपादपद्मंश्री
वैद्यनाथंतमहंनमामि ॥ ५ ॥ याम्येसदंगेन
गरेतिरम्येविभूषितांगंविविधैश्चभोगैः ॥
सद्भक्तिमुक्तिप्रदमीशमेकंश्रीनागनाथंशर-
णंप्रपद्ये ॥ ६ ॥ महाद्रिपार्श्वेचतटेरमंतंसंपू
ज्यमानंसततंमुनींद्रैः ॥ सुरासुरैर्यक्षमहोर
गाद्यैःकेदारमीशंशिवमेकमीडे ॥ ७॥सह्या
द्रिशीर्षेविमलेवसंतंगोदावरीतीरपवित्रदे

शे ॥ यद्दर्शनात्पातकनाशमाशु प्रयातितं त्र्यं
बकमीशमीडे ॥ ८ ॥ सुताम्रपर्णीजलराशि
योगे निबध्य सेतुं विशिखैरसंख्यैः ॥ श्रीराम
चंद्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि
॥ ९ ॥ यं डाकिनीशाकिनिकासमाजे निषेव्य
माणं पिशिताशनैश्च ॥ सदैव भीमादिपदप्र
सिद्धं तं शंकरं भक्तहितं नमामि ॥ १० ॥ सानंद
मानंदवने वसंतमानंदकंदं हतपापवृंदं ॥ वा
राणसीनाथमनाथनाथं श्रीविश्वनाथं शर-
णं प्रपद्ये ॥ ११ ॥ इलापुरे रम्यविशालकेऽस्मि
न्समुल्लसंतं च जगद्वरेण्यम् ॥ वंदे महोदारत-
रस्वभावं घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥
ज्योतिर्मयद्वादशलिंगकानां शिवात्मनां प्रो
क्तमिदं प्रियेण ॥ स्तोत्रं पठित्वा मनुजोऽतिभ-
क्त्या फलं तदालोक्य निजं भजेच्च ॥ १३ ॥ ॥

॥ इतिद्वादशज्योतिर्लिंगस्तोत्रंसमाप्तम् ॥

# अथद्वादशज्योतिर्लिंगानि.

श्रीगणेशायनमः॥ ॥सौराष्ट्रेसोमनाथंच श्रीशैलेमल्लिकार्जुनं ॥उज्जयिन्यांमहाकालमोंकारममलेश्वरं ॥१॥ पर्यल्यांवैजनाथंचडाकिन्यांभीमशंकरं ॥ सेतुबंधेतुरामेशंनागेशंदारुकावने ॥२॥ वाराणस्यांतुविश्वेशंत्र्यंबकंगौतमीतटे ॥ हिमालयेतुकेदारंघृष्णेशंचशिवालये ॥३॥ एतानिज्योतिर्लिंगानिसायंप्रातःपठेन्नरः॥ सप्तजन्मकृतपापंस्मरणेनविनश्यति ॥४॥ ॥ ॥

इतिद्वादशज्योतिर्लिंगानि

## अथदारिद्र्यदहनस्तोत्रप्रारंभः ॥

श्रीगणेशायनमः॥ ॥विश्वेश्वरायनरकार्णवतारणायकर्णामृतायशशिशेखरधारणाय ॥ कर्पूरकांतिधवलायजटाधरायदारिद्र्यदुःखदहनायनमःशिवाय ॥१॥ गौरीप्रियायरजनीशकलाधरायकालांतकायभुजगाधिपकंकणाय ॥ गंगाधरायगजराजविमर्दनायदारिद्र्यदुःखदमनायनमःशिवाय ॥२॥ भक्तिप्रियायभवरोगभयापहायउग्रायदुर्गभवसागरतारणाय ॥ ज्योतिर्मयायगुणनामसुनृत्यकायदारिद्र्यदुःखद० ॥३॥ चर्मांबरायशवभस्मविलेपनायभालेक्षणायमणिकुंडलमंडिताय ॥ मंजीरपादयुगुलायजटाधरायदारिद्र्यदुःखद० ॥४॥ पंचाननायफणिराजविभूषणायहेमांशुकायभुवनत्रयमंडिताय ॥ आनंदभू-

भिवरदायनमोभयायदारिद्र्यदुःखदहना-
यनमःशिवाय ॥ ५॥ भानुप्रियायभवसा-
गरतारणायकालांतकायकमलासनपूजि
ताय ॥ नेत्रत्रयायशुभलक्षणलक्षितायदा
रिद्र्यदुःखदहनायनमःशिवाय ॥ ६ ॥ राम
प्रियायरघुनाथवरप्रदायनामप्रियायनर-
कार्णवतारणाय ॥ पुण्येषुपुण्यभरितायसु
रार्चितायदारिद्र्यदुःखद० ॥ ७ ॥ मुक्ते-
श्वरायफलदायगणेश्वरायगीतप्रियाय
वृषभेश्वरवाहनाय ॥ मातंगचर्मवसनाय-
महेश्वरायदा० ॥ ८ ॥ वसिष्ठेनकृतंस्तोत्रं
सर्वरोगनिवारणम् ॥ सर्वसंपत्करंशीघ्रंपु
त्रपौत्रादिवर्धनम् ॥ ९ ॥ त्रिसंध्यंयः पठेन्नि
त्यंसहिस्वर्गमवाप्नुयात् ॥ १० ॥ ॥इतिश्रीव
सिष्ठविरचितंदारिद्र्यदहनस्तोत्रंसपूर्णं॥ ॥

# अथज्वरस्तोत्रप्रारंभः

श्रीगणेशायनमः॥ ॥विद्राविते भूतगणे-
ज्वरस्तु त्रिशिरास्त्रिपात्॥ अभ्यधावत
दाशार्हं दहन्निव दिशो दश॥ अथ नाराय-
णो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम्॥१॥ माहेश्व
रो वैष्णवश्च युयुधाते ज्वरावुभौ॥ माहेश्व
रः समाक्रंदन्वैष्णवेन बलार्दितः॥२॥अल
ब्ध्वाभयमन्यत्र भीतो माहेश्वरो ज्वरः॥ श
रणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः॥३॥
॥ज्वरउवाच॥ ॥नमामि त्वानंतशक्तिं प-
रेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम्॥ विश्वो
त्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं-
प्रशांतं॥४॥ कालो दैवं कर्म जीवः स्वभा-
वो द्रव्यं क्षेत्रं प्राण आत्मा विकारः॥ तत्संघा
तो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्र-

पद्ये ॥ ५ ॥ नानाभावैर्लीलयैवोपपन्नैर्दे-
वान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गा
न्हिंसयावर्तमानान्जन्मैतत्तेभारहारायभू
मेः ॥ ६ ॥ नसोहंतेतेजसा दुःसहेनशांतो-
ग्रेणात्युल्बणेनज्वरेण ॥ तावत्तापोदेहिनां
तेंघ्रिमूलंनोसेवेरन्यावदाशानुबद्धाः ॥ ७ ॥
॥ श्रीभगवानुवाच ॥ ॥ त्रिशिरस्तेप्रसन्नो-
स्मिव्येतुतेमज्ज्वराद्भयम् ॥ योनौस्मरतिसं-
वादंतस्यत्वन्नभवेद्भयम् ॥ ८ ॥ इत्युक्तोच्युत
मानम्यगतोमाहेश्वरोज्वरः ॥ बाणस्तुरथ
मारूढः प्रागाद्योत्स्यन्जनार्दनम् ॥ ९ ॥ ॥
इतिज्वरस्तोत्रंसंपूर्णं

अथ कालभैरवाष्टक प्रारंभः

श्रीगणेशायनमः ॥ ॥ अथकालभैरवाष्ट

कं लिख्यते ॥ ॥देवराजसेव्यमानपावनां
घ्रिपंकजंव्यालयज्ञसूत्रमिंदुशेखरंकृपाकरं
॥ नारदादियोगिवृंदवंदितंदिगंबरंकाशिका
पुराधिनाथकालभैरवंभजे ॥१॥ भानुको
टिभास्वरंभवाब्धितारकंपरंनीलकंठमी
प्सितार्थदायकंत्रिलोचनं ॥ कालकालमंबु
जाक्षमक्षशूलमक्षरंकाशिकापुराधिनाथ-
कालभैरवंभजे ॥२॥ शूलटंकपाशदंडपा
णिमादिकारणंश्यामकायमादिदेवमक्षरं-
निरामयं ॥ भीमविक्रमंप्रभुंविचित्रतांडव
प्रियंकाशिकापुराधिनाथकालभैरवंभजे
॥३॥ भुक्तिमुक्तिदायकंप्रशस्तचारुविग्रहं
भक्तवत्सलंस्थितंसमस्तलोकविग्रहं ॥ नि
क्वणन्मनोज्ञहेमकिंकिणीलसत्कटिंकाशि
कापुराधिनाथकालभैरवंभजे ॥४॥ धर्म

सेतुपालकं अधर्ममार्गनाशकंकर्मपाशमो-
चकंसुशर्मदायकंविभुं ॥ स्वर्णवर्णशेषपा
शशोभितांगमंडलंकाशिकापुराधिनाथ-
कालभैरवंभजे ॥५॥ रत्नपादुकाप्रभाभि-
रामपादयुग्मकंनित्यमद्वितीयमिष्टदैवतंनि
रंजनं ॥ मृत्युदर्पनाशनंकरालदंष्ट्रमोषणंका
शिकापुराधिनाथकालभैरवंभजे ॥६॥ अ-
ट्टहासभिन्नपद्मजांडकोशसंततिं दृष्टिपात
नष्टपापजालमुग्रशासनं ॥ अष्टसिद्धिदाय-
कंकपालमालिकंधरंकाशिकापुराधिनाथ-
कालभैरवंभजे ॥ ७॥ भूतसंघनायकंविशा
लकीर्तिदायकंकाशिवासलोकपुण्यपापशो
धकंविभुं ॥ नीतिमार्गकोविदंपुरातनंजगत्प
तिंकाशिकापुराधिनाथकालभैरवंभजे ॥
८॥ कालभैरवाष्टकंपठंतियेमनोहरंज्ञान

मुक्तिसाधनंविचित्रपुण्यवर्धनं ॥शोकमो
हदैन्यलोभकोपतापनाशनं तेप्रयांतिकाल
भैरवांघ्रिसन्निधिं ध्रुवं ॥९॥ ॥इतिश्रीम-
च्छंकराचार्यविरचितंकालभैरवाष्टकंसंपूर्ण
म् ॥ ॥५॥ ॥७॥ ॥

---

## अथत्रिपुरसुंदरीस्तोत्रप्रारंभः

श्रीगणेशायनमः ॥ अथत्रिपुरसुंदरी-
स्तोत्रप्रारंभः ॥ ॥कदंबवनचारिणींमुनि
कदंबकानंदिनींनितंबजितभूधरांसुरनि
तंबिनीसेवितां ॥नवांबुरुहलोचनामभिन
वांबुदश्यामलां त्रिलोचनकुटुंबिनींत्रिपुर
सुंदरीमाश्रये ॥१॥ कदंबवनवासिनींकन
कवल्लकीधारिणींमहार्हमणिहारिणींमु-
खसमुल्लसद्वारुणीं ॥ दयाविभवकारिणीं

विशदलोचनीचारणींत्रिलोचनकुटुंबिनींत्रिपुरसुंदरीमाश्रये ॥ २ ॥ कदंबवनशालयाकुचभरोल्लसन्मालयाकुचोपमितशैलयागुरुकृपालसद्वेलया ॥ मदारुणकपोलयामधुरगीतवाचालयाकयापिघननीलयाकवचितावयंलीलया ॥३॥ कदंबवनमध्यमांकनकमंडलोपस्थितांषडंबुरुहवासिनींसततसिद्धसौदामिनीं ॥ बिडंबितजपारुचिंविकचचंद्रचूडामणींत्रिलोचनकुटुंबिनींत्रिपुरसुं० ॥ ४ ॥ कुचांचितविपंचिकांकुटिलकुंतलालंकृतांकुशेशयनिवासिनींकुटिलचित्तविद्वेषिणीं ॥ मदारुणविलोचनांमनसिजारिसंमोहिनींमतंगमुनिकन्यकांमधुरभाषिणीमाश्रये ॥ ५ ॥ स्मरेत्प्रथमपुष्पिणींरुधिरबिंदुनीलांबरांगृहीतमधुपात्रिकांमधुविघूर्ण

नेत्रांचलां ॥ घनस्तनभरोन्नतांगलितचूलि कांश्यामलां त्रिलोचनकुटुंबिनीं त्रि० ॥ ६ ॥ सकुंकुमविलेपनामलकचुंबिकस्तूरिकांसमंदहसितेक्षणांसशरचापपाशांकुशां ॥ अशेषजनमोहिनीमरुणमाल्यभूषांबरां जपाकुसुमभासुरांजपविधौस्मराम्यंबिकां ॥ ७ ॥ पुरंदरपुरंध्रिकां चिकुरबंधसैरंध्रिकां पितामहपतिव्रतां पटुपटीरचर्चारतां ॥ मुकुंदरमणीं मणीलसदलंक्रियाकारिणीं भजामि भुवनांबिकां सुरवधूटिकांचेटिकां ॥ ८ ॥ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितं त्रिपुरसुंदरीस्तोत्रं संपूर्णम् ॥ ॥

इतित्रिपुरसुंदरीस्तोत्रंसमाप्तं

---

## अथगंगाष्टकप्रारंभः

श्रीगणेशायनमः॥ ॥मानःशैलसुतासपत्निवसुधाशृंगारहारावलिस्वर्गारोहणवैजयंतिभवतींभागीरथींप्रार्थये॥त्वत्तीरेवसतस्त्वदंबुपिबतस्त्वद्वीचिषुप्रेंखतस्त्वन्नामस्मरतस्त्वदर्पितदृशः स्यान्मेशरीरव्ययः॥ १॥ त्वत्तीरेतरुकोटरांतरगतोगंगेविहंगोवरंत्वन्नीरेनरकांतकारिणिवरंमत्स्योथवाकच्छपः॥नैवान्यत्रमदांधसिंधुरघटासंघट्टघंटारणत्कारस्त्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः॥२॥ उक्षापक्षीतुरगउरगःकोपिवावारणोवावाराणस्यांजननमरणक्लेशदुःखासहिष्णुः॥नत्वन्यत्रप्रविरलरणत्किंकिणीक्वाणमिश्रंवारस्त्रीभिश्चमरमरुतावीजितोभूमिपालः॥३॥काकैर्निष्कुषितंश्वभिःकवलितंगोमायुभिर्लुंठितंस्रोतोभि

स्खलितंनदांबुलुलितंवीचीभिरांदोलितम् ॥
दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानं क-
दाद्रक्ष्येहंपरमेश्वरित्रिपथगेभागीरथिस्वं
वपुः ॥ ४ ॥ अभिनवबिसवल्लीपादपद्मस्य
विष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला ॥
जयतिजयपताकाकाप्यसौमोक्षलक्ष्म्याःक्ष
पितकलिकलंकाजान्हवीनःपुनातु ॥ ५ ॥
एतत्तालतमालसालसरलव्यालोलवल्ली-
लताच्छन्नंसूर्यकरप्रतापरहितंशंखेंदुकुंदो
ज्वलं ॥ गंधर्वामरसिद्धकिन्नरवधूतुंगस्तना-
स्फालितंस्नानायप्रतिवासरंभवतुमेगांगं-
जलंनिर्मलं ॥ ६ ॥ गांगंवारिमनोहारिमुरा
रिचरणच्युतं ॥ त्रिपुरारिशिरश्चारिपापहा
रिपुनातुमाम् ॥ ७ ॥ पापापहारिदुरितारि
तरंगधारिशैलप्रचारिगिरिराजगुहाविदा-

रि ॥ झंकारकारिहरिपादरजोपहारिगांगंपु
नातुसततंशुभंकारिवारि ॥ ८ ॥ गंगाष्टकं
पठतियःप्रयतःप्रभातेवाल्मीकिनाविरचितं
शुभदंमनुष्यः ॥ प्रक्षाल्यगात्रकलिकल्मष
पंकमाशुमोक्षंलभेत्पततिनैवनरोभवाब्धौ
॥ ९ ॥ ॥ इतिश्रीवाल्मीकिनाविरचितंगंगा
ष्टकस्तोत्रंसंपूर्णम् ॥ ॥श्रीकृष्णार्पणमस्तु
इतिगंगाष्टकंसमाप्तं

---

## अथनर्मदाष्टकस्तोत्रप्रारंभः

श्रीगणेशायनमः ॥ ॥सबिंदुसिंधुसुस्खल
त्तरंगभंगरंजितंद्विषत्सुपापजातजातका
रिवारिसंयुतम् ॥ कृतांतदूतकालभूतभी-
तिहारिवर्मदेत्वदीयपादपंकजंनमामिदेवि
नर्मदे ॥ १ ॥ त्वदंबुलीनदीनमीनदिव्यसंप-

दायकंकलौमलौघभारहारिसर्वतीर्थनायकं
॥ सुमन्दकन्दनक्रचक्रचाकशर्मदेत्वदी
यपादपंकजंनमामिदेविनर्मदे ॥ २ ॥ महाग
भीरनीरपूरपापधूतभूतलंध्वनत्समस्तपा
तकारिदारितापदाचलम् ॥ जगल्लयेमहाभ
येमृकंडसूनुहर्म्यदेत्वदीय० ॥ ३ ॥ गतंतदैव
मेभयंत्वदंबुवीक्षितंयदामृकंडसूनुशौनका
सुरारिसेविसर्वदा ॥ पुनर्भवाब्धिजन्मजंभ
वाब्धिदुःखवर्मदेत्वदीय० ॥ ४ ॥ अलक्षल-
क्षकिन्नरामरासुरादिपूजितंसुलक्षनीरतीर
धीरपक्षिलक्षकूजितम् ॥ वसिष्ठशिष्टपिप्प
लादकर्दमादिशर्मदेत्वदीय० ॥ ५ ॥ सनत्कु
मारनाचिकेतकश्यपात्रिषट्पदैर्धृतंस्वकीय
मानसेषुनारदादिषट्पदैः ॥ रवींदुरन्तिदेव
देवराजकर्मशर्मदेत्वदीय० ॥ ६ ॥ अलक्षलक्ष

लक्ष पापलक्षसारसायुधंततस्तुजीवजंतु-
तंतुभुक्तिमुक्तिदायकम् ॥ विरिंचिविष्णुशं
करस्वकीयधामवर्मदे त्वदीय० ॥ ७ ॥ अहो
मृतंस्वनंश्रुतंमहेशकेशजातटे किरातसूत
वाडवेषुपंडितेशठेनटे ॥ दुरंतपापतापहारि
सर्वजंतुशर्मदे त्वदीय० ॥ ८ ॥ इदंतुनर्मदाष्ट
कंत्रिकालमेवयेसदापठंतितेनिरंतरंनयांति
दुर्गतिंकदा ॥ सुलभ्यदेहदुर्लभंमहेशधाम-
गौरवंपुनर्भवानरानवैविलोकयंतिरौरवम् ॥
९ ॥ ॥ इतिश्रीमच्छंकराचार्यविरचितंनर्म
दाष्टकस्तोत्रंसंपूर्णं ॥ ॥ ५ ॥ ॥ ५ ॥

इतिनर्मदाष्टकस्तोत्रंसमाप्तं

---

अन्नपूर्णास्तोत्रप्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ नित्यानंदकरीवरा-

भयकरीसौंदर्यरत्नाकरीनिर्धूताखिलघोर-
पावनकरीप्रत्यक्षमाहेश्वरी ॥ प्रालेयाचल
वंशपावनकरीकाशीपुराधीश्वरीभिक्षांदेहि
कृपावलंबनकरीमातान्नपूर्णेश्वरी ॥ १ ॥ ना
नारत्नविचित्रभूषणकरीहेमांबराडंबरीमुक्ता
हारविलंबमानविलसद्वक्षोजकुंभांतरी ॥ का
श्मीरागुरुवासितारुचिकरीकाशीपुराधी-
श्वरीभिक्षांदेहि० ॥ २ ॥ योगानंदकरीरिपुक्ष
यकरीधर्मार्थनिष्ठाकरीचंद्रार्कानलभासमा
नलहरीत्रैलोक्यरक्षाकरी ॥ सर्वैश्वर्यसम-
स्तवांछितकरीकाशीपुराधीश्वरीभिक्षांदे-
हि० ॥ ३ ॥ कैलासाचलकंदरालयकरीगौरी
उमाशंकरीकौमारीनिगमार्थगोचरकरीॐ
कारबीजाक्षरी ॥ मोक्षद्वारकपाटपाटनकरी
काशीपुराधीश्वरीभिक्षांदेहिकृपा० ॥ ४ ॥-

दृश्यादृश्यप्रभूतवाहनकरीब्रह्मांडभांडोदरी लीलानाटकसूत्रभेदनकरीविज्ञानदीपांकुरी ॥ श्रीविश्वेशमनःप्रसादनकरीकाशीपुराधीश्वरीभिक्षांदेहि० ॥ ५ ॥ उर्वीसर्वजनेश्वरीभगवतीमातान्नपूर्णेश्वरीवेणीनीलसमानकुंतलहरीनित्यान्नदानेश्वरी ॥ सर्वानंदकरीदशाशुभकरीकाशीपुराधीश्वरीभिक्षांदेहि० ॥ ६ ॥ आदिक्षांतिसमस्तवर्णनकरीशंभोस्त्रिभावाकरीकाश्मीरात्रिजलेश्वरीत्रिलहरीनित्यांकुराशर्वरी ॥ कामाकांक्षकरीजनोत्नवकरीकाशीपुराधीश्वरीभिक्षांदेहि० ॥ ७ ॥ देवीसर्वविचित्ररत्नरचितादाक्षायणीसुंदरीवामंस्वादुपयोधरप्रियकरीसौभाग्यमाहेश्वरी ॥ भक्ताभीष्टकरीदशाशुभकरीकाशीपुराधीश्वरीभिक्षांदेहि० ॥ ८

॥ चंद्रार्कानलकोटिकोटिसदृशा चंद्रांशुबिंबाधरी चंद्रार्काग्निसमानकुंतलहरी चंद्रार्कवर्णेश्वरी ॥ मालापुस्तकपाशसांकुशधरी काशीपुराधीश्वरी भिक्षांदेहि० ॥ ९ ॥ क्षत्रत्राणकरी महाभयकरी माता कृपासागरी साक्षान्मोक्षकरी सदाशिवकरी विश्वेश्वरश्रीधरी ॥ दक्षाक्रंदकरी निरामयकरी काशीपुराधीश्वरी भिक्षांदेहि० ॥ १० ॥ अन्नपूर्णे सदापूर्णे शंकरप्राणवल्लभे ॥ ज्ञानवैराग्यसिद्ध्यर्थं भिक्षांदेहि च पार्वति ॥ ११ ॥ माता च पार्वती देवी पिता देवो महेश्वरः ॥ बांधवाः शिवभक्ताश्च स्वदेशो भुवनत्रयं ॥ १२ ॥ ॥ इति श्रीशंकराचार्यविरचितं अन्नपूर्णास्तोत्रं संपूर्णम् ॥ ॥ ॥ ॥ ॥ ॥

अथसंकष्टनाशनगणपतिस्तोत्रप्रा०

श्रीगणेशायनमः ॥ ॥नारदउवाच ॥ ॥प्र
णम्यशिरसादेवंगौरीपुत्रंविनायकं ॥ भ
क्त्यावासःस्मरेन्नित्यमायुःकामार्थसिद्ध-
ये ॥१॥ प्रथमंवक्रतुंडंच एकदंतंद्वितीयक
म् ॥तृतीयंकृष्णपिंगाक्षंगजवक्त्रंचतुर्थकं
म् ॥२॥ लंबोदरंपंचमंचषष्ठंवि कटमेवच
॥सप्तमंविघ्नराजंचधूम्रवर्णंतथाऽष्टमम् ॥
३॥ नवमंभालचंद्रंचदशमंतुविनायकम् ॥
एकादशंगणपतिंद्वादशंतुगजाननम् ॥४॥
एतानिद्वादशनामानित्रिसंध्यंयःपठेन्नरः
नचविघ्नभयंतस्यसर्वसिद्धिकरंप्रभो ५ वि-
द्यार्थीलभतेविद्यांधनार्थीलभतेधनम् ॥पु
त्रार्थीलभतेपुत्रान्मोक्षार्थीलभतेगतिम्
६ जपेद्गणपतिस्तोत्रंषड्भिर्मासैःफलंलभेत्

॥ संवत्सरेणसिद्धिंच लभतेनात्रसंशयः॥ ७॥ अष्टानांब्राह्मणानांचलिखित्वायःस मर्पयेत् ॥ तस्यविद्याभवेत्सर्वागणेशस्यप्रसादतः॥ ८॥ ॥इतिश्रीनारदपुराणेसंकष्टनाशनंनामस्तोत्रंसंपूर्णम् ॥ ॥ॐ॥ ॥

इतिसंकष्टनाशनगणपतिस्तोत्रं समाप्तम्

---

## अथ आदित्यहृदयंप्रारभ्यते.

श्रीगणेशायनमः॥ ॥श्रीभास्करायनमः ॥ ॥शतानीकउवाच॥ ॥कथमादित्यमुद्यंतमुपतिष्ठेद्विजोत्तम॥ एतन्मेब्रूहिविप्रेंद्रप्रपद्येशरणंतव ॥१॥ ॥सुमंतुरुवाच ॥ ॥इदमेवपुरापृष्टः शंखचक्रगदाधरः॥ प्रणम्यशिरसादेवमर्जुनेनमहात्मना ॥२॥ कुरुक्षेत्रेमहाराजनिवृत्तेभारतेरणे ॥ कृष्णा

नाथंसमासाद्यप्रार्थयित्वाब्रवीदिदम् ॥ ३॥
॥ ॥अर्जुनउवाच ॥ ॥ज्ञानंचधर्मशास्त्रा
णांगुह्याद्गुह्यतरंतथा ॥ मयाकृष्णापरिज्ञा
तंवाङ्मयंसचराचरम् ॥ ४॥ सूर्यस्यातिप
यंन्यासंवक्तुमर्हसिमाधव ॥ भक्त्यापृच्छा-
मिदेवेशकथयस्वप्रसादतः ॥ ५॥ सूर्यभ-
क्तिंकरिष्यामिकथंसूर्यंप्रपूजयेत् ॥ तदहं-
श्रोतुमिच्छामित्वत्प्रसादेनयादव ॥ ६॥ ॥
श्रीभगवानुवाच ॥ ॥रुद्रादिदैवतैःसर्वैः
पृष्टेनकथितंमया ॥ वक्ष्येहंसूर्यविन्यासं
शृणुपांडवयत्नतः ॥ ७॥ अस्माकंयत्त्वया
पृष्टमेकचित्तोभवार्जुन ॥ तदहंसंप्रवक्ष्या
मिआदिमध्यावसानकम् ॥ ८ ॥ ॥अर्जु
नउवाच ॥ ॥नारायणास्तरस्त्रेष्ठपृच्छामि
त्वांमहायशाः ॥ कथमादित्यमुद्यंतमुपति

ष्टेत्सनातनं ॥९॥ ॥श्रीभगवानुवाच॥ ॥
साधुपार्थमहाबाहोबुद्धिमानसिपांडव ॥ य
न्मांपृच्छस्युपस्थानंतत्पवित्रंविभावसोः ॥
१०॥ सर्वमंगलमांगल्यंसर्वपापप्रणाशनम्
॥ सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥११
॥ अमित्रदमनंपार्थसंग्रामेजयवर्धनम् ॥
वर्धनंधनपुत्राणामादित्यहृदयंशृणु ॥१२
॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः
॥ त्रिषुलोकेषुविख्यातंनिःश्रेयसकरंपरम्
॥१३॥ देवदेवंनमस्कृत्यप्रातरुत्थायचार्जु
न ॥ विघ्नान्यनेकरूपाणिनश्यंतिस्मरणा-
दपि ॥१४॥ तस्मात्सर्वप्रयत्नेनसूर्यमावा
हयेत्सदा ॥ आदित्यहृदयंनित्यंजाप्यंत-
च्छृणुपांडव ॥१५॥ यज्जपान्मुच्यतेजंतु-
र्दारिद्र्याद्दाशदुस्तरात् ॥ लभतेचमहासि

ह्रीं कुष्ठव्याधि विनाशिनीम् ॥ १६ ॥ अस्मिन्मं
त्रेऋषिश्छंदोदेवताशक्तिरेवच ॥ सर्वमेवम
हाबाहोकथयामितवाग्रतः ॥ १७ ॥ मयाते-
गोपितंन्यासंसर्वशास्त्रप्रबोधितं ॥ अथते
कथयिष्यामिउत्तमंमंत्रमेवच ॥ १८ ॥ ॐ-
अस्यश्रीआदित्यहृदयस्तोत्रमंत्रस्य ॥ श्री
कृष्णाऋषिः ॥ श्रीसूर्यात्मात्रिभुवनेश्वरोदेव
ता ॥ अनुष्टुप्छंदः ॥ हरितहयरथंदिवाक
रंघृणिरितिबीजम् ॥ ओंनमोभगवतेजित
वैश्वानरजातवेदसेइतिशक्तिः ॥ ओंनमोभ
गवतेआदित्यायनमइतिकीलकम् ॥ ओंअ
ग्निगर्भदेवताइतिमंत्रः ॥ ओंनमोभगवतेतु
भ्यमादित्यायनमोनमः ॥ श्रीसूर्यनारायण
प्रीत्यर्थेजपेविनियोगः ॥ ॥ अथन्यासः ॥
॥ ओंह्रांअंगुष्ठाभ्यांनमः ॥ ओंह्रींतर्जनी-

भ्यांनमः ॥ ओंहूंमध्यमाभ्यांनमः ॥ ओं
ह्रैंअनामिकाभ्यांनमः ॥ ओंह्रौंकनिष्ठि-
काभ्यांनमः ॥ ओंह्रःकरतलकरपृष्ठाभ्यां
नमः ॥ ओंह्रांहृदयायनमः ॥ ओंह्रींशि
रसेस्वाहा ॥ ओंह्रूंशिखायैवषट् ॥ ओंह्रैं
कवचायहुं ॥ ओंह्रौंनेत्रत्रयायवौषट् ॥ ओं
ह्रःअस्त्रायफट् ॥ ओंह्रांह्रींह्रूंह्रैंह्रौंह्रः
इतिदिग्बंधः ॥ ॥ अथध्यानं ॥ ॥ भास्व
द्रत्नाढ्यमौलिःस्फुरदधररुचारंजितःचा
रुकेशोभास्वान्योदिव्यतेजाःकरकमलयु-
तःस्वर्णवर्णप्रभाभिः ॥ विश्वाकाशावका
शग्रहपतिशिखरेभातियश्चोदयाद्रौसर्वा
नंदप्रदाताहरिहरनमितःपातुमांविश्वच-
क्षुः ॥ १ ॥ पूर्वपष्टदलंपद्मंप्रणवादिप्रति
ष्ठितम् ॥ मायाबीजंदलाष्टाग्रेयंत्रमुद्धार

येदिति ॥ २॥ आदित्यंभास्करंभानुंरविंसू-
र्यंदिवाकरम् ॥ मार्त्तंडंतपनंचेतिदलेष्वत्रसु
योजयेत् ॥ ३॥ दीप्तासूक्ष्माजयाभद्राविभू
तिर्विमलातथा ॥ अमोघाविद्युताचेतिमध्ये
श्रीःसर्वतोमुखी ॥ ४॥ सर्वज्ञःसर्वगश्चैवस
र्वकारणदेवता ॥ सर्वेशंसर्वहृदयंनमामि
सर्वसाक्षिणाम् ॥ ५॥ सर्वात्मासर्वकर्त्ताच
सृष्टिजीवनपालकः ॥ हितःस्वर्गापवर्गश्च
भास्करेशनमोःस्तुते ॥ ६॥ ॥इतिप्रार्थना
॥ ॥नमोनमस्तेस्तुसदाविभावसोसर्वात्म-
नेसप्तहयायभानवे ॥ अनंतशक्तिर्मणिभू
षणेनददस्वभक्तिंममभुक्तिमव्ययाम् ॥ ७
॥ अर्कंतुमूर्ध्निविन्यस्यललाटेतुरविंन्यसेत्
॥ विन्यसेन्नेत्रयोःसूर्यंकर्णयोश्चदिवाकरम्
॥ ८॥ नासिकायांन्यसेद्भानुंमुखेवैभास्करं

न्यसेत् ॥ पर्जन्यमोष्ठयोश्चैवतीक्ष्णंजिव्हांन
रेन्यसेत् ॥ ९ ॥ स्कुवर्णरेतसंकंठेस्कंधयो-
स्तिग्मतेजसम् ॥ बाव्होस्तुपूषणंचैवमित्रं
वैपृष्ठुतोन्यसेत् ॥ १० ॥ वरुणंदक्षिणेहस्तेत्व
ष्टारंवामतःकरे ॥ हस्तावुष्णाकरःपातुहृद-
यंपातुभानुमान् ॥ ११ ॥ उदरेतुयमंविद्यादा
दित्यंनाभिमंडले ॥ कट्यांतुविन्यसेद्धंसंरु
द्रमूर्वोस्तुविन्यसेत् ॥ १२ ॥ जान्वोस्तुगोप-
तिंन्यस्यसवितारंतुजंघयोः ॥ पादयोश्चवि
वस्वंतंगुल्फयोश्चदिवाकरम् ॥ १३ ॥ बाह्य-
तस्तुतमोध्वंसंभगमभ्यंतरेन्यसेत् ॥ सर्वा
गेषुसहस्रांशुंदिग्विदिक्षुभगंन्यसेत् ॥ १४
॥ इतिदिग्बंधः ॥ ॥ एषआदित्यविन्यासोदे
वानामपिदुर्लभः ॥ इमंभक्त्यान्यसेत्पार्थ-
सयातिपरमांगतिम् ॥ १५ ॥ कामक्रोधकृ-

तान्यापान्मुच्यतेनात्रसंशयः ॥ सर्पादपिभ
यंनैवसंग्रामेषुपथिष्वपि ॥ १६॥ रिपुसंघट्ट
कालेषुतथाचोरसमागमे ॥ त्रिसंध्यंजपतो
न्यासंमहापातकनाशनम् ॥ १७॥ विस्फोट
कसमुत्पन्नंतीव्रज्वरसमुद्भवम् ॥ शिरोरोगंने
त्ररोगंसर्वव्याधिविनाशनम् ॥ १८॥ कुष्ठ-
व्याधिस्तथादद्रुरोगाश्चविविधाश्चये ॥ जप-
मानस्यनश्यंतिशृणुभक्त्यातदर्जुन ॥ १९॥
आदित्योमंत्रसंयुक्त आदित्योभुवनेश्वरः
॥ आदित्यान्नापरोदेवोह्यादित्यःपरमेश्वरः
॥२०॥ आदित्यमर्चयेद्ब्रह्माशिवआदित्यम
र्चयेत् ॥ यदादित्यमयंतेजोममतेजस्तदर्जु
न ॥२१॥ आदित्यंमंत्रसंयुक्तमादित्यंभुव
नेश्वरम् ॥ आदित्यंयेप्रपश्यंतिमांपश्यंति
नसंशयः ॥२२॥ त्रिसंध्यमर्चयेत्सूर्यंस्मरे

द्भक्त्या तु यो नरः ॥ न स पश्यति दारिद्र्यं ज-
न्मजन्मनि चार्जुन ॥ २३ ॥ एतत्ते कथितं पार्थ
आदित्यहृदयं मया ॥ शृण्वन्मुक्तश्च पापेभ्यः
सूर्यलोके महीयते ॥ २४ ॥ नमो भगवते तुभ्य
मादित्याय नमो नमः ॥ आदित्यः सविता सूर्यः
खगः पूषा गभस्तिमान् ॥ २५ ॥ सुवर्णः स्फ-
टिको भानुः स्फुरितो विश्वतापनः ॥ रविर्वि-
श्वो महातेजाः सुवर्णः सुप्रबोधकः ॥ २६ ॥
हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः
॥ मार्तंडो गोपतिः श्रीमान्कृतज्ञश्च प्रतापवा
न् ॥ २७ ॥ नमिस्रहा भगो हंसो नासत्यश्च त-
मोनुदः ॥ शुद्धो विरोचनः केशी सहस्रांशुः
र्महाप्रभुः ॥ २८ ॥ विवस्वान्पूषणो मृत्यु-
र्मिहिरो जामदग्न्यजित् ॥ धर्मरश्मिः पतं
गश्च शरण्यो मित्रहा तपः ॥ २९ ॥ दुर्विज्ञेय-

गतिः श्ररस्त्रेजोराशिर्महायशाः ॥ शंभुश्चि
त्रांगदः सौम्यो हव्यकव्यप्रदायकः ॥ ३० ॥ अं
शुमानुत्तमोदेव ऋग्यजुःसामएवच ॥ हरि
दश्वस्तमोदारः सप्तसप्तिर्मरीचिमान् ॥ ३१
॥ अग्निगर्भोदितेःपुत्रः शंभुस्तिमिरनाशनः
॥ पूषाविश्वंभरोमित्रः सुवर्णःसुप्रतापवा-
न् ॥ ३२ ॥ आतपीमंडलीभास्वांस्तपनःस
र्वतापनः ॥ कृतविश्वोमहातेजाः सर्वरत्नम
योद्भवः ॥ ३३ ॥ अक्षरश्चाक्षरश्चैव प्रभाकर
विभाकरौ ॥ चंद्रश्चंद्रांगदः सौम्यो हव्यकव्य
प्रदायकः ॥ ३४ ॥ अंगारकोंगदोगस्तीरक्तां
गश्चांगवर्धनः ॥ बुधोबुद्धासनो बुद्धिर्बुद्धा-
त्माबुद्धिवर्धनः ॥ ३५ ॥ बृहद्भानुर्बृहद्भासो-
बृहद्धामा बृहस्पतिः ॥ शुक्रस्त्वंशुक्ररेता-
स्त्वंशुक्रांगः शुक्रभूषणः ॥ ३६ ॥ शनिमान्

शानिरूपस्त्वंशनैर्गच्छसिसर्वदा ॥ अना-
दिरादिरादित्यस्तेजोराशिर्महातपाः ॥ ३७
॥ अनादिरादिरूपस्त्वमादित्योदिक्पतिर्य
मः ॥ भानुमान्भानुरूपस्त्वंस्वर्भानुर्भानु-
दीप्तिमान् ॥ ३८ ॥ धूमकेतुर्महाकेतुः सर्व-
केतुरनुत्तमः ॥ तिमिरावरणः शंभुः स्रष्टा
मार्तंडएवच ॥ ३९ ॥ नमः पूर्वायगिरयेप
श्चिमायनमोनमः ॥ नमोत्तरायगिरयेदक्षि
णायनमोनमः ॥ ४० ॥ नमोनमः सहस्रांशो
ह्यादित्यायनमोनमः ॥ नमः पद्मप्रबोधाय
नमस्तेद्वादशात्मने ॥ ४१ ॥ नमोविश्वप्रबो-
धाय नमोभ्राजिष्णुजिष्णवे ॥ ज्योतिषेचन
मस्तुभ्यंज्ञानार्कायनमोनमः ॥ ४२ ॥ प्रदीप्ता
यप्रगल्भाययुगांतायनमोनमः ॥ नमस्तेहो
तृपतयेपृथिवीपतयेनमः ॥ ४३ ॥ नमोंका

रवषट्कारसर्वयज्ञनमोस्तुते ॥ ऋग्वेदाय
यजुर्वेदसामवेदनमोस्तुते ॥ ४४ ॥ नमोहा
टकवर्णायभास्करायनमोनमः ॥ जयायज
यभद्रायहरिदश्वायतेनमः ॥ ४५ ॥ दिव्या
यदिव्यरूपायग्रहाणांपतयेनमः॥नमस्तेशुक्व
येनित्यंनमःकुरुकुलात्मने ॥ ४६ ॥ नमस्त्रै-
लोक्यनाथायभूतानांपतयेनमः ॥ नमःकै
वल्यनाथायनमस्तेदिव्यचक्षुषे ॥ ४७ ॥ त्वं
ज्योतिस्त्वंद्युतिर्ब्रह्मात्वंविष्णुस्त्वंप्रजापतिः
॥ त्वमेवरुद्रोरुद्रात्मावायुरग्निस्त्वमेवच ॥-
४८ ॥ योजनानांसहस्त्रेद्वेद्वेशतेद्वेचयोजने
॥ एकेननिमिषार्द्धेनक्रममाणनमोऽस्तुते ॥
४९ ॥ नवयोजनलक्षाणिसहस्त्रद्विशता-
निच ॥ यावद्घटीप्रमाणेनक्रममाणनमोस्तु
ते ॥ ५० ॥ अग्रतश्चनमस्तुभ्यंपृष्ठतश्चसदा

नमः ॥ पार्श्वतश्चनमस्तुभ्यंनमस्तेचास्तुस
र्वदा ॥ ५१ ॥ नमःसुरारिहंत्रेच सोमसूर्या-
ग्निचक्षुषे ॥ नमोदिव्यायव्योमायसर्वतंत्र
मयायच ॥ ५२ ॥ नमोवेदांतवेद्यायसर्वक
र्मादिसाक्षिणे ॥ नमोहरितवर्णायसुवर्णा
यनमोनमः ॥ ५३ ॥ अरुणोमाघमासेतु-
सूर्योवैफाल्गुनेतथा ॥ चैत्रमासेतुवेदांगो
भानुर्वैशाखतापनः ॥ ५४ ॥ ज्येष्ठमासेतपे
दिंद्र आषाढेतपतेरविः ॥ गभस्तिःश्रावणे
मासियमोभाद्रपदेतथा ॥ ५५ ॥ इषेसुव-
र्णरेताश्चकार्तिकेचदिवाकरः ॥ मार्गशीर्षे
तपेन्मित्रःपौषेविष्णुःसनातनः ॥ ५६ ॥

पुरुषस्त्वाधिकमासेमासाधिक्यतुकल्पयेत्
॥ इत्येतेद्वादशादित्याःकाश्यपेयाःप्रकीर्ति
ताः ॥ ५७ ॥ उग्ररूपामहात्मानस्तपंतेविश्व

रूपिणः ॥ धर्मार्थकाममोक्षाणांप्रस्फुटाहे-
तवोनृप ॥ ५८ ॥ सर्वपापहरंचैवमादित्यं
संप्रपूजयेत् ॥ एकधादशधाचैवशतधाच
सहस्रधा ॥ ५९ ॥ तपंतेविश्वरूपेणसृजं-
तिसंहरंतिच ॥ एषविष्णुःशिवश्चैवब्रह्मा
चैवप्रजापतिः ॥ ६० ॥ महेंद्रश्चैवकालश्चय
मोवरुणएवच ॥ नक्षत्रग्रहताराणामधिपो
विश्वतापनः ॥ ६१ ॥ वायुरग्निर्धनाध्यक्षोभू
तकर्त्तास्वयंप्रभुः ॥ एषदेवोहिदेवानांसर्व
माप्यायतेजगत् ॥ ६२ ॥ एषकर्त्ताहिभूता
नांसंहर्त्तारक्षकस्तथा ॥ एषलोकान्नुलोक
श्चसप्तद्वीपाश्चसागराः ॥ ६३ ॥ एषपाता
लसमस्थोदैत्यदानवराक्षसाः ॥ एषधा-
ताविधाताचबीजंक्षेत्रंप्रजापतिः ॥ ६४ ॥
एषएवप्रजानित्यंसंवर्धयतिरश्मिभिः ॥

एषयज्ञः स्वधास्वाहाह्रीश्रीःश्वपुरुषोत्त-
मः ॥६५॥ एषभूतात्मकोदेवः सूक्ष्मोव्य
क्तःसनातनः ॥ईश्वरः सर्वभूतानां परमेष्ठी
प्रजापतिः ॥६६॥ कालात्मासर्वभूतात्मा-
वेदात्मा विश्वतोमुखः ॥ जन्ममृत्युजराव्या
धिसंसारभयनाशनः ॥६७॥दारिद्र्यव्य-
सनध्वंसीश्रीमान्देवोदिवाकरः ॥ विकर्त्त-
नोविवस्वांश्चमार्तंडोभास्करोरविः ॥६८॥
लोकप्रकाशकःश्रीमाँल्लोकचक्षुर्ग्रहेश्वरः॥
लोकसाक्षीत्रिलोकेशःकर्त्ताहर्त्तातमिस्रहा
॥६९॥तपनस्तापनश्चैवशुचिःसप्ताश्ववा
हनः॥ गभस्तिहस्तोब्रह्मण्यःसर्वदेवनम
स्कृतः ॥७०॥ आयुरारोग्यमैश्वर्यंनराना
र्यश्चमंदिरं ॥ यस्यप्रसादात्संतुष्टिरादित्य
हृदयंजपेत् ॥७१॥इत्येतैर्नामभिःपार्थ-

आदित्यंस्तौतिनित्यशः ॥ प्रातरुत्थायकौं
न्तेयतस्यरोगभयंनहि ॥ ७२ ॥ पातकान्मु
च्यतेपार्थव्याधिभ्यश्चनसंशयः ॥ एकसं-
ध्यंद्विसंध्यंवासर्वपापैःप्रमुच्यते ॥ ७३ ॥
त्रिसंध्यंजपमानस्तुपश्येच्चपरमंपदम् ॥
यदन्हात्कुरुतेपापंतदन्हात्प्रतिमुच्यते ॥
७४ ॥ यद्रात्र्यात्कुरुतेपापंतद्रात्र्यात्प्रति
मुच्यते ॥ दद्रुस्फोटककुष्ठानिमंडलानिवि-
षूचिका ॥ ७५ ॥ सर्वव्याधिमहारोगभूत-
बाधास्तथैवच ॥ डाकिनीशाकिनीचैवमहा
रोगभयंकुतः ॥ ७६ ॥ येचान्येदुष्टरोगाश्च
ज्वरातीसारकादयः ॥ जपमानस्यनश्यंति
जीवेच्चशरदांशतं ॥ ७७ ॥ संवत्सरेणमर
णंयदातस्यध्रुवंभवेत् ॥ अशीर्षांपश्य-
तिच्छायामहोरात्रंधनंजय ॥ ७८ ॥ य

स्त्विदंपठतेभक्त्याभानोर्वरिमहात्मनः ॥ प्रा
तःस्नानेकृतेपार्थएकाग्रकृतमानसः ॥ ७९
॥ सुवर्णचक्षुर्भवतिनचांधस्तुप्रजायते ॥
पुत्रवान्धनसंपन्नोजायतेचारुजःसुखी
॥ ८० ॥ सर्वसिद्धिमवाप्नोतिसर्वत्रविजयी
भवेत् ॥ आदित्यहृदयंपुण्यंसूर्यनामवि
भूषितम् ॥ ८१ ॥ श्रुत्वाचनिखिलंपार्थस-
र्वपापैःप्रमुच्यते ॥ अतःपरतरंनास्तिसि
द्धिकामस्यपांडव ॥ ८२ ॥ एतज्जपस्वकौं
तेययेनश्रेयोह्यवाप्स्यसि ॥ आदित्यहृ-
दयंनित्यंयःपठेत्सुसमाहितः ॥ ८३ ॥ भ्रू
णहामुच्यतेपापात्कृतघ्नोब्रह्मघातकः ॥
गोघ्नःसुरापोदुर्भोजीदुःप्रतिग्रहकारकः ॥
॥ ८४ ॥ पातकानिचसर्वाणिदहत्येवनसं-
शयः ॥ यइदंशृणुयान्नित्यंजपेद्वापिसमा

हितः ॥ ८५ ॥ सर्वपापविशुद्धात्मा सूर्यलोके महीयते ॥ अपुत्रो लभते पुत्रान् निर्धनो धनमाप्नुयात् ॥ ८६ ॥ कुरोगी मुच्यते रोगाद्भक्त्या यः पठते सदा ॥ यस्त्वादित्यदिने पार्थ नाभिमात्रजले स्थितः ॥ ८७ ॥ उदयाचलमारूढं भास्करं प्रणतः स्थितः ॥ जपते मानवो भक्त्या शृणुयाद्वापि भक्तितः ॥ ८८ ॥ स याति परमं स्थानं यत्र देवो दिवाकरः ॥ अमित्रदमनं पार्थ यदा कर्तुं समारभेत् ॥ ८९ ॥ तदा प्रतिकृतिं कृत्वा शत्रोश्चरणपांसुभिः ॥ आक्रम्य वामपादेन आदित्यहृदयं जपेत् ॥ ९० ॥ एतन्मंत्रं समाहूय सर्वसिद्धिकरं परम् ॥ ॥ ओं ह्रीं ह्रिमालीदं स्वाहा ॥ ओं ह्रीं निलीदं स्वाहा ॥ ओं ह्रीं मालीदं स्वाहा ॥ ॥ इति मंत्रः ॥ ॥ त्रिभिश्च रोगी भवति ज्वरी भवति पं

चभिः ॥ जपेस्तुसप्तभिःपार्थराक्षसीं ननु
मा विशेत् ॥ ९१ ॥ राक्षसेनाभिभूतस्य वि
कारान्शृणु पांडव ॥ गीयते नृत्यते नग्न आ
स्फोटयति धावति ॥ ९२ ॥ शिवारुतं चकुरु
ते हसते क्रंदते पुनः ॥ एवं संपीड्यते पार्थ य
द्यपि स्यान्महेश्वरः ॥ ९३ ॥ किं पुनर्मानुषः
कश्चिच्छौचाचारविवर्जितः ॥ पीडितस्य न-
संदेहो ज्वरो भवति दारुणः ॥ ९४ ॥ यदा चानु
ग्रहं तस्य कर्तुमिच्छेच्छुभंकरम् ॥ तदा स-
लिलमादाय जपेन्मंत्रमिमं बुधः ॥ ९५ ॥ न
मो भगवते तुभ्यमादित्याय नमोनमः ॥ ज
याय जयभद्राय हरिदश्वाय ते नमः ॥ ९६
॥ स्नापयेत्तेन मंत्रेण शुभं भवति नान्यथा
॥ अन्यथा च भवेद्दोषो नश्यते नात्र संशयः
॥ ९७ ॥ अतस्ते निखिलः प्रोक्तः पूजां चैव नि

बोधमे ॥ उपलिप्तेशुचौदेशे नियतोवाग्यतः
शुचिः ॥ ९८ ॥ वृत्तंवाचतुरस्रंवालिप्तभूमौलि
खेच्छुचिः ॥ त्रिधानत्रलिखेत्पद्ममष्टपत्रंसक
र्णिकम् ॥ ९९ ॥ अष्टपत्रंलिखेत्पद्मंलिप्तगोम
यमंडले ॥ पूर्वपत्रेलिखेत्सूर्यमाग्नेय्यांतुरविं
न्यसेत् ॥ १०० ॥ याम्यायांचविवस्वंतंनैर्ऋ-
त्यांतुभगंन्यसेत् ॥ प्रतीच्यांवरुणंविद्यात्वा
यव्यांमित्रमेवच ॥ १०१ ॥ आदित्यमुत्तरेपत्रेई
शान्यांविष्णुमेवच ॥ मध्येतुभास्करंविद्यात्-
क्रमेणैवंसमर्चयेत् ॥ १०२ ॥ अतःपरतरंना-
स्तिसिद्धिकामस्यपांडव ॥ महातेजःसमु-
द्यंतंप्रणमेत्सकृतांजलिः ॥ १०३ ॥ सकेसरा
णिपद्मानिकरवीराणिचार्जुन ॥ तिलतंडुल
युक्तानिकुशगंधोदकानिच ॥ १०४ ॥ रक्तचं
दनमिश्राणिकृत्वावैताम्रभाजने ॥ धृत्वाशि

रसितत्पात्रंजानुभ्यांधरणींस्पृशेत् ॥१०५
॥मंत्रपूतंगुडाकेशचार्घ्यंदद्यात्तुगभस्तये ॥
सायुधंसरथंचैवसूर्यमावाहयाम्यहम् ॥-
१०६॥स्वागतोभव॥सुप्रतिष्ठितोभव॥सन्नि
धोभव॥सन्निहितोभव॥संमुखोभव॥ इतिपं
चमुद्राः॥ ॥स्फुटयित्वाऽहंयेत्सूर्यंभुक्तिं
मुक्तिंलभेन्नरः॥१०७॥ ॥ओंश्रींविद्याकि
लिकिलिकटकेष्टसर्वार्थसाधनायस्वाहा॥
ओंश्रींह्रींह्रूंहंसः सूर्यायनमःस्वाहा ॥ओं
श्रींह्रांह्रींह्रूंह्रैंह्रौंह्रः सूर्यमूर्तयेस्वाहा॥
ओंश्रींह्रींखंखखः॥लोकायसर्वमूर्त्तयेस्वाहा
॥ओंह्रूं मार्तंडायस्वाहा॥ नमोस्तुसूर्याय
सहस्रभानवे नमोऽस्तुवैश्वानरजातवेदसे
॥त्वमेवचार्घ्यंप्रतिगृण्हदेवदेवाधिदेवाय-
नमोनमस्ते॥१०८॥ नमोभगवतेतुभ्यंन

मस्तेजातवेदसे ॥ दत्तमर्घ्यंमयाभानोत्वंगृ-
हाणनमोस्तुते ॥ १०९ ॥ एहिसूर्यसहस्रांशो
तेजोराशेजगत्पते ॥ अनुकंपयमांदेवगृहा
णार्घ्यंनमोस्तुते ॥ ११० ॥ नमोभगवतेतुभ्यं
नमस्तेजातवेदसे ॥ ममेदमर्घ्यंगृण्हत्वंदेव
देवनमोऽस्तुते ॥ १११ ॥ सर्वदेवाधिदेवायआ
धिव्याधिविनाशिने ॥ इदंगृहाणमेदेवसर्व
व्याधिर्विनश्यतु ॥ ११२ ॥ नमःसूर्यायशां
तायसर्वरोगविनाशिने ॥ ममेप्सितंफलं-
दत्वाप्रसीदपरमेश्वर ॥ ११३ ॥ ओंनमोभ
गवतेसूर्यायस्वाहा ॥ ओंशिवायस्वाहा ॥
ओंसर्वात्मनेसूर्यायनमःस्वाहा ॥ ओंअक्ष
य्यतेजसेनमःस्वाहा ॥ ॥ सर्वसंकटदारिद्र्यं
शत्रुंनाशयनाशय ॥ सर्वलोकेषुविश्वात्मन्
सर्वात्मन्सर्वदर्शक ॥ ११४ ॥ नमोभगवते-

सूर्यकुष्टरोगान्विखंडय ॥ आयुरारोग्यंमे
श्वर्यंदेहिदेवनमोस्तुते ॥११५॥ नमोभगव
तेतुभ्यमादित्यायनमोनमः ॥ ॥ ओंअक्ष
य्यतेजसेनमः ॥ ओंसूर्यायनमः ॥ ओंवि
श्वमूर्त्तयेनमः ॥ ॥ आदित्यंचशिवंविंद्या
च्छिवमादित्यरूपिणम् ॥ उभयोरंतरंनास्ति
आदित्यस्यशिवस्यच ॥११६॥ एतदिच्छा
म्यहंश्रोतुंपुरुषोवैदिवाकरः ॥ उदयेब्रह्मणो
रूपंमध्यान्हेतुमहेश्वरः ॥११७॥ अस्तमाने
स्वयंविष्णुस्त्रिमूर्तिश्चदिवाकरः ॥ नमोभग
वतेतुभ्यंविष्णवेप्रभविष्णवे ॥११८॥ ममे
दमर्घ्यंप्रतिगृण्हदेवदेवाधिदेवायनमोनम
स्ते ॥ श्रीसूर्यायसांगायसपरिवारायश्री-
सूर्यनारायणायेदमर्घ्यम् ॥ ११९॥ हिमघ्ना
यतमोघ्नायरक्षोघ्नायच तेनमः ॥ कृतघ्नघ्ना

यसस्यायतस्मैसूर्यात्मनेनमः ॥१२०॥ ज
योजयश्चविजयोजितप्राणोजितश्रमः ॥
मनोजवोजितक्रोधोवाजिनः सप्त कीर्तिताः
॥१२१॥ हरितहयरथंदिवाकरं कनकमयांबु
जरेणुपिंजरम् ॥ प्रतिदिनमुदयेनवंनवं शर
णमुपैमिहिरण्यरेतसम् ॥१२२॥ नतंव्या
लाः प्रबाधंतेनव्याधिभ्योभयंभवेत् ॥ न-
नागेभ्योभयंचैवनचभूतभयंक्वचित् ॥१२३
॥ अग्निशत्रुभयंनास्तिपार्थिवेभ्यस्तथैवच-
॥ दुर्गतिंतरतेघोरांप्रजांचलभतेपशून् ॥१२४
॥ सिद्धिकामोलभेत्सिद्धिंकन्याकामस्तुकन्य
काम् ॥ एतत्पठेत्सकौंतेयभक्तियुक्तेनचेत-
सा ॥१२५॥ अश्वमेधसहस्रस्यवाजपेय
शतस्यच ॥ कन्याकोटिसहस्रस्यदत्तस्यफ
लमाप्नुयात् ॥१२६॥ इदमादित्यहृदयंयो

धीतेसततंनरः ॥ सर्वपापविशुद्धात्मासू
र्यलोकेमहीयते ॥१२७॥ नास्त्यादित्यस-
मोदेवो नास्त्यादित्यसमागतिः ॥ प्रत्यक्षो
भगवान्विष्णुर्येनविश्वंप्रतिष्ठितम् ॥१२८
॥नवतिर्योजनंलक्षंसहस्राणिशतानिच-
॥ यावद्घटीप्रमाणेन तावच्चरतिभास्करः॥
१२९ ॥गवांशतसहस्रस्यसम्यकूदत्तस्यय
त्फलं ॥ तत्फलंलभतेविद्वान्शांतात्मास्तौ
तियोरविम् ॥१३०॥ योऽधीतेसूर्यहृदयंस
कलंसफलंभवेत् ॥ अष्टानांब्राह्मणानांच
लेखयित्वासमर्पयेत् ॥१३१॥ ब्रह्मलोकेऋ
षीणांचजायतेमानुषोपिवा ॥जातिस्मर-
त्वमाप्नोतिशुद्धात्मानात्रसंशयः ॥१३२॥
अजायलोकत्रयपावनायभूतात्मनेगोपत-
येवृषाय ॥ सूर्यायसर्वप्रलयांतकायनमो

महाकारुणिकोत्तमाय ॥१३३॥ विवस्वते-
ज्ञानभूतांतरात्मने जगत्प्रदीपाय जगद्धितै-
षिणे ॥ स्वयंभुवे दीप्तसहस्रचक्षुषे सुरोत्त-
मायामिततेजसे नमः ॥१३४॥ सुरैरनेकैः
परिसेविताय हिरण्यगर्भाय हिरण्मयाय॥
महात्मने मोक्षपदाय नित्यं नमोऽस्तु ते वास-
रकारणाय ॥१३५॥ आदित्यश्चार्चितोदेव-
आदित्यः परमंपदम् ॥ आदित्योमातृको-
भूत्वा आदित्योवाङ्मयं जगत् ॥१३६॥ आ
दित्यं पश्यते भक्त्या मां पश्यति ध्रुवं नरः ॥ ना
दित्यं पश्यते भक्त्या न स पश्यति मां नरः ॥-
१३७ ॥ त्रिगुणं च त्रितत्त्वं च त्रयो देवास्त्रयो
ऽग्नयः ॥ त्रयाणां च त्रिमूर्तिस्त्वं तुरीयस्त्वं न
मोऽस्तु ते ॥१३८॥ नमः सवित्रे जगदेकच
क्षुषे जगत्प्रसूति स्थिति नाश हेतवे ॥ त्रयी

मध्यार्य्यत्रिगुणात्मधारिणोविरिंचिनारायण
शंकरात्मने ॥ १३९ ॥ यस्योदयेनेहजगत्प्र
बुध्यतेप्रवर्त्ततेचाखिलकर्मसिद्धये ॥ ब्रह्में
द्रनारायणरुद्रवंदितःसनःसदायच्छतुमं
गलंरविः ॥ १४० ॥ नमोस्तुसूर्यायसहस्ररं-
श्मयेसहस्रशाखान्वितसंभवात्मने ॥ स
हस्रयोगोद्भवभागभागिनेसहस्रसंख्या
युगधारिणेनमः ॥ १४१ ॥ यन्मंडलंदीप्ति
करंविशालंरत्नप्रभंतीव्रमनादिरूपम् ॥
दारिद्र्यदुःखक्षयकारणंचपुनातुमांतत्स
वितुर्वरेण्यम् ॥ १४२ ॥ यन्मंडलंदेवगणैः
सुपूजितंविप्रैःस्तुतंभावनमुक्तिकोविद-
म् ॥ तंदेवदेवंप्रणमामिसूर्यंपुनातुमांत-
त्सवितुर्वरेण्यम् ॥ १४३ ॥ यन्मंडलंज्ञानघ
नंत्वगम्यंत्रैलोक्यपूज्यंत्रिगुणात्मरूपं ॥

समस्ततेजोमयदिव्यरूपंपुनातुमांतत्सवि
तुर्वरेण्यम् ॥१४४॥ यन्मंडलंगूढमतिप्रबो
धंधर्मस्यवृद्धिंकुरुतेजनानाम् ॥ तत्सर्वपा
पक्षयकारणंचपुनातुमांतत्सवितुर्वरेण्यम्
॥१४५॥ यन्मंडलंव्याधिविनाशदक्षंयदृग्य
जुःसामसुसंप्रगीतं ॥ प्रकाशितंयेनचभू
र्भुवःस्वःपुनातुमांतत्सवितुर्वरेण्यम् ॥१४६
॥ यन्मंडलंवेदविदोवदंतिगायंतियच्चारण
सिद्धसंघाः ॥ यद्योगिनोयोगजुषांचसंघाः
पुनातुमांतत्सवितुर्वरेण्यम् ॥१४७॥ यन्मं
डलंसर्वजनेषुपूजितंज्योतिश्चकुर्यादिहम-
र्त्यलोके ॥ यत्कालकालादिमनादिरूपंपुना
तुमांतत्सवितुर्वरेण्यम् ॥ १४८॥ यन्मंडलं
विष्णुचतुर्मुखाख्यंयदक्षरंपापहरंजनानाम्
॥ यत्कालकल्पक्षयकारणंचपुनातुमांतत्स

वितुर्वरेण्यम् ॥ १४९ ॥ यन्मंडलंविश्वसृजं
प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम् ॥ यस्मि
न्जगत्संहरतेऽखिलंचपुनातुमांतत्सवितुर्व
रेण्यम् ॥ १५० ॥ यन्मंडलंसर्वगतस्यविष्णो
रात्मापरंधामविशुद्धतत्वं ॥ सूक्ष्मांतरैर्योग
पथानुगम्यंपुनातुमांतत्सवितुर्वरेण्यम् ॥
१५१ ॥ यन्मंडलंब्रह्मविदोवदंतिगायंतिय
च्चारणसिद्धसंघाः ॥ यन्मंडलंवेदविदःस्म
रंतिपुनातुमांतत्सवितुर्वरेण्यम् ॥ १५२ ॥ य
न्मंडलंवेदविदोपगीतंयद्योगिनांयोगपथा
नुगम्यम् ॥ तत्सर्ववेदंप्रणमामिसूर्यंपुना
तुमांतत्सवितुर्वरेण्यम् ॥ १५३ ॥ मंगलाष्ट
मिदंपुण्यं यःपठेत्सततंनरः ॥ सर्वपापवि
शुद्धात्मासूर्यलोकेमहीयते ॥ १५४ ॥ ध्ये-
यःसदासवितृमंडलमध्यवर्त्तीनारायणः-

सरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुंडलवान्किरीटीहारि हिरण्मयवपुर्धृतशंखचक्रः ॥ १५५ ॥ सशंखचक्रंरविमंडलेस्थितेकुशेशयाक्रांतमनंतमच्युतं ॥ भजामिबुद्ध्यातपनीयमूर्त्तिंसुरोत्तमंचित्रविभूषणोज्ज्वलम् ॥ १५६ ॥ एवंब्रह्मादयोदेवाऋषयश्चतपोधनाः ॥ कीर्त्तयंतिसुरश्रेष्ठंदेवंनारायणंविभुं ॥ १५७ ॥ वेदवेदांगशरीरंदिव्यदीप्तिकरंपरम् ॥ रक्षोघ्नंरक्तवर्णंचसृष्टिसंहारकारकं ॥ १५८ ॥ एकचक्रोरथोयस्यदिव्यःकनकभूषितः ॥ समेभवतुसुप्रीतःपद्महस्तोदिवाकरः ॥ १५९ ॥ आदित्यःप्रथमंनामद्वितीयंतुदिवाकरः ॥ तृतीयंभास्करःप्रोक्तंचतुर्थंतुप्रभाकरः ॥ १६० ॥ पंचमंतुसहस्रांशुःषष्ठंचैवत्रिलोचनः ॥ सप्तमंहरिदश्वश्चअष्टमंतु-

विभावसुः ॥१६१॥ नवमंदिनकृत्प्रोक्तंदश
मंद्वादशात्मकम् ॥ एकादशंत्रयीमूर्त्तिर्द्वा
दशांसूर्यएवच ॥१६२॥ द्वादशादित्यनामानि
प्रातःकालेपठेन्नरः ॥ दुःस्वप्ननाशनंचैवस-
र्वदुःखंचनश्यति ॥१६३॥ दद्रुकुष्ठहरंचैव-
दारिद्र्यंहरतेध्रुवम् ॥ सर्वतीर्थप्रदंचैवसर्व-
कामप्रवर्द्धनम् ॥१६४॥ यः पठेत्प्रातरुत्था
यभक्त्यानित्यमिदंनरः ॥ सौख्यमायुस्त-
थारोग्यंलभतेमोक्षमेवच ॥१६५॥ अग्नि-
मीळेनमस्तुभ्यमिषेत्वोर्जेस्वरूपिणे ॥ अ-
ग्नआयाहिवीतस्त्वंनमस्तेज्योतिषांपते ॥
१६६॥ शन्नोदेविनमस्तुभ्यंजगच्चक्षुर्नमो-
स्तुते ॥ पंचमायोपवेदायनमस्तुभ्यंनमो-
नमः ॥१६७॥ पद्मासनः पद्मकरः पद्मग-
र्भसमद्युतिः ॥ सप्ताश्वरथसंयुक्तो द्विभुजः

श्रीगोवर्द्धननाथपादद्वन्द्वस्य आदित्यस्यनमस्का-
न्योगोवर्द्धनपूर्वशब्दः जन्मांनरसहस्रेषुदा-
रे ॥ लक्ष्मीदासत -१॥ उदयगिरिमुपेतं
... रपयहस्तं निखिलभुवननेत्रंरत्नर
त्नोपमेयं ॥ तिमिरकरिमृगेंद्रंबोधकंपद्मि-
सदा ... रमभिवंदेसुंदरंविश्ववंद्यम् ॥
७० ॥ ॥इतिश्रीभविष्योत्तरपुराणेश्रीकृ-
ष्णार्जुनसंवादे आदित्यहृदयस्तोत्रंसंपूर्णम्
॥ ॥श्रीसविनासूर्यनारायणार्पणमस्तु ॥ ॥

---

## अथनवग्रहस्तोत्रंप्रारभ्यते

श्रीगणेशायनमः ॥ ॥जपाकुसुमसंकाशं
काश्यपेयंमहाद्युतिम् ॥ तमोरिंसर्वपापघ्नंप्र
णतोऽस्मिदिवाकरं ॥ १ ॥ दधिशंखतुषाराभं
क्षीरार्णवसमुद्भवम् ॥नमामिशशिनंसो

॥ नवमंदिनकृत्मोत्तं दश
मंशंभोर्मुकुटभूष कादशंत्रयीमूर्त्तिर्हि
संभूतंविद्युत्कांतिर ॥ द्वादशादित्यनामानि
क्तिहस्तंतंमंगलंप्रणा ... चैवस-
गुकलिकाश्यामंरूपेणाप्रतिमंबुध ॥
म्यंसौम्यगुणोपेतंतंबुधंप्रणमाम्यहं सर्व-
४ ॥ देवानांचऋषीणांचगुरुंकांचनस्या
भम् ॥ बुद्धिमंतंत्रिलोकेशंतंनमामिबृ-
स्पतिम् ॥ ५ ॥ हेमकुंदमृणालाभंदैत्यानां
परमंगुरुं ॥ सर्वशास्त्रप्रवक्तारंभार्गवंप्र-
णमाम्यहम् ॥ ६ ॥ नीलांजनसमाभासंर
विपुत्रंयमाग्रजम् ॥ छायामार्तंडसंभूतंत
न्नमामिशनैश्चरम् ॥ ७ ॥ अर्धकायंमहा-
वीर्यंचंद्रादित्यविमर्दनम् ॥ सिंहिकागर्भ-
संभूतंतंराहुंप्रणमाम्यहम् ॥ ८ ॥ पलाश
पुष्पसंकाशंतारकाग्रहमस्तकम् ॥ रौद्रं

श्रीगोवर्द्धननाथपनाम्यहम् ॥ ९ ॥ इति
न्योगोवर्द्धनपूर्वश.स्क.समाहितः ॥ दि-
रे ॥ लक्ष्मीदासनन्ग्रशांतिर्भविष्यति ॥ १०
वारो
न रनारीनृपाणांच भवेदुःस्वप्ननाशनम् ॥
स र्यमतुलंतेषामारोग्यंपुष्टिवर्धनम् ॥ ११
रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः ॥
ाःसर्वाः प्रशमंयांतिव्यासोब्रूतेनसंशयः ॥
१२ ॥ ॥ इतिश्रीव्यासविरचितंआदित्यादिन
वग्रहस्तोत्रंसंपूर्णम् ॥ ॥ श्रीआदित्यादिन-
वग्रहार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥

## अथशनिस्तोत्रप्रारंभः

श्रीगणेशायनमः ॥ ॥ अस्यश्रीशनैश्चरस्तो
त्रमंत्रस्यदशरथऋषिः शनैश्चरोदेवता त्रि
ष्टुप्छंदः शनैश्चरप्रीत्यर्थेजपेविनियोगः ॥

॥दशरथउवाच ॥त्वमंदिनकृत्योत्तंदश
थबभ्रुः कृष्णः शनिर्ादशंत्रयीमूर्तिर्द्वी
स्वंस्मृतोयोहरतेचपीड़ादशादित्यनामानि
दनाय ॥१॥ सुरासुरः ।कपुरुषोगेबसु-
धर्वविद्याधरपन्नगाश्च ॥ पीड्यंतिसर्वे
मस्थितेन तस्मैनमःश्रीरविनंदनाय ॥२॥
नरानरेंद्राः पशवोमृगेंद्रावन्याश्चयेकीटप
गभृंगाः ॥ पीड्यंतिसर्वेविषमस्थितेन तस्मै
नमःश्रीरविनंदनाय॥ ३॥ देशाश्चदुर्गाणि-
वनानि यत्रसेनानिवेशाः पुरपत्तनानि ॥पी
ड्यंतिसर्वेविषमस्थितेन तस्मैनमःश्रीरवि
नंदनाय ॥ ४ ॥ तिलैर्यवैर्माषगुडान्नदाने-
र्लोहेननीलांबरदानतोवा ॥ प्रीणातिमंत्रै-
र्निजवासरेचतस्मैनमःश्रीरविनंदनाय ॥५
प्रयागकूलेयमुनातटेचसरस्वतीपुण्यज-

श्रीगोवर्द्धननाथपादकमलद्वंद्वेबहुप्रीतिमान्योगोवर्द्धनपूर्वशब्दसहितोदासोस्तिमुंबापुरे ॥ लक्ष्मीदासननूजनुःसधनवान्भट्टान्ववायोद्भवःशोत्स्यःस्तोत्रकलापएषभवतारत्नेनयत्नेनभोः ॥ १ ॥ विज्ञापितोहममुनेनिसदादरेणमित्रेणमेप्रथमएवतदीयभागः ॥ संशोधनेबहुलयत्नयुतेनरत्ननाम्नापुरातनग्रथप्रविलोक्यपुस्तम् ॥ २ ॥ अब्धिहस्तनवचंद्रमितेब्देविक्रमस्यशुभकार्त्तिकमासे ॥ शोधितःसविधुवारसिताद्येजीवनेशगुरुपादकृपातः ॥ ३ ॥ ॥ ७ ॥ ॥ ७

# जाहिरात.

सर्वलोकांस कळविण्यांत येतें कीं, खालीं लिहिलेलीं पुस्तकें ज्यांस घेणें असतील त्याणीं पुणें येथें जगद्धितेच्छु छापखान्यांत अगरशनवारपेठेंत खबुतर खान्याजवळ आनंदबागत्यांत, मुंबई येथें इंदुप्रकाश छापखान्यां १ व रामवाडीचे नाक्यावर रावजी श्रीधर गोंधळेकर यांचे दुकानीं रोखरुपये टपालखर्च सुद्धां पाठविले असतां पुस्तकें रवाना केलीं जातील पत्र नारपेड पाठवूं नये कळावें.

| ग्रंथाचें नांव | किं० रुपये | ट. ख. |
|---|---|---|
| अद्भुतरामायण कृष्णा करुणामृत. | २ | ८= |
| स्तोत्रकलापभाग पहिला. | ॥= | ८= |
| स्तोत्रकलापभाग दुसरा. | ।= | ८= |
| घटखरपर काव्य चंद्रिका. | ८= | ८- |
| महिपतिकृत संतविजय. | ४ | ॥॥ |
| श्रीरामदासस्वामींची बखर. | २ | ।= |
| श्रीकृष्णचरित्र पूर्णोदयेंदु नाटक. | ।• | ८- |
| हिडिंब वध आख्यान. | ८- | ८- |
| आत्मविचार चंद्रोदय गुजराथी. | ।≡ | ८- |
| मल्हार विरहशतक गुजराथी. | ८= | ८- |

गोवर्धनदास लक्ष्मीदास.